Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथ जैमिनीयं सूत्रम्.

श्रीनीलकंठ ज्योतिर्विद्विरचितयासुबोधिन्याटीकयासहितं.

( अध्यायद्वयम्. )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only



श्री महावीर जैन आराधना केन्द्र - आ. श्री कैलाससागरसूरि ज्ञानमंदिर, कोबा
(जि. गांधीनगर)

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशायनमः ॥ ॥ सृष्टिस्थित्यंतकर्त्रीहरिहरविधिभिःसेवितानंददात्रीनानातंत्रोक्तमार्गैर्मुनिभिरपिधियाभालचं
द्रोज्वलांगी आरक्ताभत्रिनेत्राशिवशवनिलयाराजराजेश्वरीसावाचंनोह्यातनोतुप्रतिपदकठिनेजैमिनेसूत्रसंघे १ वि
वस्वद्वंशाढ्यावनिपतिवरश्रीरणजितोदयांभोधेर्वाचातवकरुणयाजैमिनिमुनेःनिरालंबेशास्त्रेजननिगिरिजेयास्यतिन
किंसुटीकामेकामोहृदिसमभिपूर्तिरचयितुं २ अथप्राक्तनकर्मज्ञानानुष्ठेयकाशीवासादिनाजगदुद्धारंचिकीर्षुः करु
णासिंधुर्जैमिनिमुनिः प्रेप्सितग्रंथप्रतिबंधकोपशमनायश्रीशंकरप्रणतिपूर्वकंसकललोकशुभाशुभसूचकजातकशा

## श्रीगणेशायनमः ॥ उपदेशंव्याख्यास्यामः १ अभिपश्यन्त्यृक्षाणि २ पार्श्वभेच ३

स्त्रमनुष्ठातुंप्रतिजानीते उचतत्पदंउपदंतस्येशःशंकरस्तंव्याख्यास्यामः नमस्कुर्मःउकारः शंकरःप्रोक्तइत्येकाक्षरको
शःप्रकृतार्थस्तुउपदिश्यतेप्रकाश्यतेप्राक्तनशुभाशुभकर्मानेनेत्युपदेशोजातकशास्त्रविशेषस्तंव्याख्यास्यामः कथयि
ष्यामइति नन्वस्मिन्शास्त्रेकिमन्यशास्त्रतोदृष्टिर्विलक्षणोतान्यशास्त्रप्रसिद्धैवेतिसंशयंपरिहरन्नाह १ ऋक्षाणिराशयः
अभिसंम्मुखंपार्श्वभेपार्श्वराशीचपश्यंतिअवलोकयंति क्रमतश्चरेऽष्टमपंचमैकादशराशयःस्थिरेषष्ठतृतीयनवमराशयः
द्विःस्वभावेसप्तमचतुर्दशमराशयस्तथाभवन्तीतिदृष्टिचक्रेद्रष्टव्यंवृद्धिकारिकाच चरंधनंविनास्थास्नुंस्थिरमंत्यंतंविना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चरं युग्मंस्वेनविनायुग्मंपश्यतीत्ययमागमइति तदयंसंग्रहःचरानाग ८ बाणेश ११ राशीन्स्वतोवेस्थिराःषट् ६ तृतीयां ३ क १ राशीनूक्रमेणस्वतः शैलभं ७ वेद ४ भं पंक्ति १० भंचक्रमाद्द्विस्वभावाःप्रपश्यंतिपूर्णमितिराशिषुसिद्धंद्रष्टृदृश्यभावंखेटेष्वतिदिशाति २ ३ तन्निष्ठाःराशिस्थिताग्रहास्तद्वत्तैराशिभिस्तुल्यंयथाभवति तथास्वस्थितराशिवदेवस्वतोष्टमादिराशींस्तन्निष्ठग्रहांश्चपश्यंतीत्यर्थःतथाचोक्तंवृद्धैः चरस्थंस्थिरगःपश्येस्स्थिरस्थंचरराशिगः उभयस्थंतूभयगोनिकटस्थंविनाग्रहं शुभार्गलेधनसमृद्धिरित्यादिसूत्रेष्वर्गलपदसंकेतस्याकांक्षांनिवर्तयन्नाह ४ विचाराश्रयीभू-

**तन्निष्ठाश्चतद्वत् ४ दार ४ भाग्य २ शूल ११ स्थार्गलानिध्यातुः५कामस्थातुभूयसापापानां ६**

तस्यराशेर्निध्यातुर्द्रष्टुर्ग्रहाद्दारभाग्यस्थूलस्थाः दारादिपदबोध्यश्चतुर्थद्वितीयैकादशस्थानस्थिताग्रहाविचाराश्रयीभूतराशिद्रष्टुर्ग्रहस्यअर्गलाः अर्गलासंज्ञकास्युः अर्गलाकर्तरिइतियावत् ननुस्वाम्यादिभिर्निध्यातुःफलदातुरित्युक्तं त्वयाऽयमर्थःकथंज्ञातइतिचेच्छृणुभय २ पुण्य ११ विना ४ भावाद्रष्टुराहुः शुभार्गलमितिवृद्धवाक्यादेवशुभार्गलमर्गलाविप्रतिबंधकत्वमितिछंदोवत्सूत्राणीत्युक्तेः संधिश्छांदसः अत्राक्षरैरेवराशिभावबोधनंमुनेरभिप्रेतमित्यनुपदमेवस्फुटीभविष्यतिअस्मिन्ग्रंथेकटपयादिक्रमेणांकाग्राह्याःतत्रापिद्वादशाधिकसंख्यासान्निपातेद्वादशतष्टंकृत्वाऽवशिष्टसंख्या



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राशिभावबोधिकाअत्रप्राच्यकारिकाचकटपयवर्गभवैरिहपिंडांत्यैरक्षरैरंकाः नञिचशून्यंज्ञेयंतथास्वरेकेवलेकथितांय थादारेत्यत्रांकानांवामतोगतिरितिरीत्यादकारस्याष्टसंख्यारकारस्यद्विसंख्येत्यष्टाविंशतिसंख्यामापन्नेपुंजेद्वादशतष्टे चोर्वरिताःचतुःसंख्याभावबोधिकेति इयमर्गलाशुभपापोभयसाधारणीनचोक्तार्गलाप्रतिबंधकमादौवक्तव्यमितिवा च्यं तथासत्यर्गलापदस्यमंडूकप्लुत्यानुवृते रस्वारस्यादर्गलांतरमेवाह ५ रविक्षीणचंद्रभौमशनिराहुकेतुपापयुतबुधा नांभूयसाबाहुल्येनपापानामितिबहुवचननिर्देशात्त्रिप्रभृतिभिःपापैः कामस्थातृतीयस्थानस्थाऽर्गलाभवतिएकेनपापे

## रिःफनीचेकामस्थाविरोधिनः ७

नद्वाभ्यांचनेत्यर्थः इयमर्गलापापसंबंधिनी पूर्वातुशुभपापसाधारणीप्रेमनिधिपंडितैस्तुपापानांमध्येयोधिकांशकस्तेन तृतीयेर्गलाभवतीति यदुक्तंतत्सूत्राक्षरार्थान्नायातिपापानांभूयसेत्यनेनपापबाहुल्यंत्वायातीति बहुपापकृतकामस्थार्ग लायानिर्बाधकत्वादेवपृथक्सूत्रमिदंपूर्वार्गलाबाधकान्याह ६ दारेत्यादिपदबोध्यंचतुर्थद्वितीयैकादशस्थानस्थिता नामर्गलाकर्तॄणांखेटानांक्रमेणरिष्फादिपदबोध्यदशमद्वादशतृतीयस्थानास्थिताग्रहाविरोधिनः अर्गलाप्रतिबंधकाइ त्यर्थः तथाचदशमादिस्थानेषुग्रहाभावेसत्येवचतुर्थादिस्थानस्थैःग्रहैःअर्गलाभवतिनान्यथेतिभावः बाधकबाधकान

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्याह ७ अर्गलाकर्तृग्रहेभ्यःप्रतिबंधकाग्रहान्यूनाअल्पसंख्याकाःद्वौचेदर्गलाकर्तारावेकश्चेत्प्रतिबंधकइत्यादिविब
लानिर्बलाश्चयदितदाप्रतिबंधकानस्युःबलमग्रेनिरूपयिष्यति अर्गलास्तत्प्रतिबंधकाश्चवृद्धैरुक्ताः भय२ पुण्य ११ वि
ना४भावाद्रष्टुराहुः शुभार्गलंस्फु १२टांग ३ ज्ञेय१०भावात्तुविपरीतार्गलंविदुः द्रष्टुर्द्रष्टृग्रहस्यद्वितीयादितः शुभार्गलं
द्वादशादितोऽशुभार्गलंप्राहुः अर्गलविरोध्यर्गलमेवविपरीतार्गलमित्युच्यते तृतीयार्गलामुपदिशति ८ त्रिकोणेपं
चमनवमयोः अर्गलातत्प्रतिबंधकश्चप्राग्वत्पंचमेग्रहसत्वेऽर्गलानवमेन्यूनसंख्यात्वनिर्बलत्वदोषरहितग्रहसत्वेऽर्ग

**न्न्यूनाविबलाश्च ८ प्राग्वत्त्रिकोणे ९**

लाप्रतिबंधकत्वमितिनचदारेत्यादिसूत्रेशांतपदस्यरिष्फेत्यादिसूत्रेधातुपदस्योपादानादेवार्थलाभेसूत्रांतरनिर्मानस्यवै
यर्थ्यापत्तिरितिवाच्यं विपरीतंकेतोरितिसूत्रेकेतुकृतव्यत्ययस्यत्रिकोणाएववक्तव्यत्वात्साफल्यप्रसंगात् अन्यथाहिदा
रभाग्यशूलेष्वपिकेतुकृतव्यत्ययापत्तिरितिभावः यत्तुकैश्चिदुक्तंप्राग्वदितिसूत्रस्यपृथक्करणसामर्थ्यादप्रतिबंधेयमर्ग
लेतितत्रतथासतिकामस्थेतिसूत्रोत्तरमेवप्रसंगात्तन्निर्मितिः स्यादितिविपरीतंकेतोरितिसार्वत्रिकंयदुक्तंतदपिनकाम
स्येतिसूत्रोत्तरंप्राग्वदितिसूत्रंचेत्तदासार्वत्रिकंस्यात् प्राग्वदितिसूत्रानंतरप्रणयनात्तत्रैवास्यप्रकृतिरित्यर्थः विपरीतमि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिसूत्रस्योत्तरसूत्रे ऽन्वयइतियदुक्तंतदपिनअष्टानांवेतिपृथक्करणसामर्थ्यादेवराहोर्न्यूनांशत्वेनकारकत्वलाभादेतन्वय स्यैवयर्थ्यापत्तिः अष्टानांवेत्यन्यमतंयदुक्तंतत्रप्रमाणाभावइतिकेतौविशेषमाह ९ केतोर्ग्रहस्यनवममर्गलास्थानंपंच मंप्रतिबंधकस्थानंकिंचिसतिमुनेस्तात्पर्येकेतोर्लग्नस्यअस्मिन्यंथेविशेषतः कारकात्फलादेशेकर्तव्येकारकान्विवक्षुरा दावात्मकारकंदर्शयति १० रव्यादिशन्यंतानांसप्तानांराव्हंतानामष्टानांवामध्येयोनभोगोग्रहःकलादिभिः कलाया आदयोंशास्तैरंशैःअंशादिभिरितियावत् अधिकःसआत्माआत्मकारकइत्यर्थःअंशपदंविहायकलादिपदेननिर्देशस्त्वं

## विपरीतंकेतोः १० आत्माधिकःकलादिभिर्नभोगः सप्तानामष्टानांवा ११

शसाम्येपिकलाधिकाधिक्येनविनिर्णेतव्यमितिज्ञापनार्थंकलादिभिरपिसाम्येवक्ष्यमाणबलेनैकतरनिर्णयः तत्रहि रव्यादिग्रहाणामंशादिसाम्येनकारकलोपेबलवत्स्थिरकारकादेवतत्तत्कारकविचारः कर्तव्यइतिननुआत्माधिकःकला दिभिर्नभोगोष्टानामित्येवपाठोऽस्तुलाघवात्उच्यते तत्राधिकपदस्यनिविष्टत्वाद्राहोस्तुसर्वग्रहांशन्यूनांशतयात्मकार कतेतिसूचनायाष्टानांवेतिपृथगुक्तिःननुकथंज्ञातमितिचेत् राहोर्विपरीतंसंचाराऩ्यूनत्वेनाधिक्यात् नभोगोष्टानामि तिपाठेत्वन्यग्रहरीत्याराहोरप्याधिक्यंप्रतीयेतद्वित्राणांग्रहाणांत्र्यंशत्वयोगेप्रसक्तेराहुयोगेविपरीतमितिसूत्रेणराहोर्योगे

नापिन्यूनांशस्य ब्रह्मत्वंस्वस्यतुसुतरामिवाल्पांशत्वेनकारत्वंभवतीत्यर्थः अत्रवृद्धसंमतिः भागाधिकःकारकःस्याद
ल्पभागोंत्यकारकः मध्यांशोमध्यखेटःस्यादुपखेटःसएवहीति नचवृद्धवाक्याद्राहोर्न्यूनांशकत्वेनात्मकारकत्वंनाया
तीतिवाच्यंशास्त्रप्रसिद्धतयाबालानामपितथैवबोधाद्विविच्यनोक्तं अत्रवृद्धवाक्यांतरंच मेषाद्यसव्यमार्गेणराहुकेतून
कारकौ अस्यार्थः राहुकेतूमेषाद्यसव्यमार्गेणसव्यंवामंअसव्यंदक्षिणंतुअसव्यमार्गेणमेषादिक्रममार्गेकारकौनविपरी
तमार्गेणतुभवतएवेतिफलितार्थः अत्रराशिकृतमाधिक्यंनग्राह्यमितिसंप्रदायः अथवा अंशादिभिर्ग्रहद्वयसाम्येसप्तम

## सईष्टेबंधमोक्षयोः १२

कारकाभावेराहुरपिग्राह्यः तस्मादष्टानांवेतिगौणः कल्पोनिरुक्तः यत्तुप्रेमनिधिपंथैर्विपरीतंकेतोरितिसूत्रंदेहलीदीप
कन्यायेनात्रान्वेतीत्युक्तंतदयुक्तं रव्यादिक्रममनादृत्यादौकेतुनिरूपणस्यायेग्यत्वात् राहोरंशाधिक्येनकारकताकेतो
स्तुन्यूनांशत्वेनकारकतेतिबाधितत्वाच्चराहोरधिकांशत्वेसतिकेतोरपितथात्वात् नवानामितितुकथंनोक्तमितिचेत् रा
हुकेत्वोरंशादिसाम्येनकारकांतराभावादष्टानामित्येवोचितमित्यलमतिविस्तरेण आत्माकारकस्योत्कर्षंदर्शयति ११
सआत्मकारकोवंधमोक्षयोरीष्टेस्वामीभवति नीचराशिपापयोगोच्चादिराशिशुभयोगैरितिशेषः नीचपापयुक्तःकार

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कः स्वदशांतर्दशासुबंधनादिदुःखदःस्यात् उच्चादिशुभयुतस्तुग्रहांतरबलेनबद्धस्यापिमोक्षणकर्त्ताभवति यद्वाप्रतिकूलकःआत्मकारकःपापकर्मप्रवृत्तिद्वारासंसाररूपबंधनदःस्यात् अनुकूलस्तुज्ञानकाशीवासादिभिर्मोक्षकर्तास्यादित्यर्थः अमात्यकारकमाह १२ तस्यात्मकारकस्यअनुपश्चात्सरणाद्गमनान्न्यूनांशतयाऽमात्यः अमात्यकारकोभवतीति भ्रातृकारकमाह १३ तस्यामात्यकारकस्यानुसरणादल्पांशतयाभ्रातृकारकःस्यात् मातृकारकमाह १४ भ्रातृकारकादल्पांशोग्रहोमातृकारकोभवति पुत्रकारकमाह १५मातृकारकान्न्यूनांशःपुत्रकारकइति ज्ञातिकारकमाह १६

**तस्यानुसरणादमात्यः १३ तस्यभ्राता १४ तस्यमाता १५ तस्यपुत्रः १६ तस्यज्ञातिः १७ तस्य दाराश्च १८ मात्रासहपुत्रमेकेसमामनंति १९ भगिन्याऽऽरतःश्यालःकनीयाज्जननीचेति २०**

पुत्रकारकादल्पांशोज्ञातिकारकइतिदाराकारकमाह १७ ज्ञातिकारकान्न्यूनांशःस्त्रीकारकः तस्यदाराइत्यनेनैवसिद्धेचकारोनुक्तसमुच्चयार्थः समस्थिरकारकपदोपपदादिभ्योपिस्त्रीविचारः कार्य्योनतुदारकारकादेवेतिसूचयति पुत्रकारकविकल्पमाह १८ मातृकारकात्पुत्रकारकविचारः कार्यइतिकेचनाचार्यावदंतिकारकद्वयैक्यंवदंतीतियावत् अथनित्यकारकान्वक्तुमुपक्रमतेतत्रादौभगिन्यादिकारकान्दर्शयति १९ आरतोभौमाद्भगिनीसामान्यंश्यालःस्त्री

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्राताकनीयान्कनिष्ठभ्राताजननीमाताएतेविचारणीयाइत्यर्थः मातुलादिकारकमाह २० उत्तरतोभौमाग्रिमाद्बुधा
त् मातुलभ्रातृभगिन्यादयोबंधवोमातृसजातीयामातृसपत्न्यश्चविचारणीयाः पितामहादिकारकमाह २१ गुरुमुखा
देवगुर्वादिभ्यएवक्रमेणपितामहपतिपुत्राइतिजानीयाद्विचार्याइत्यर्थः नचैवंचेदग्रिमसूत्रेपत्नीपतिःपितराविति वा
च्यं मंदात्पुत्रइतितृतीयः सूत्रोपादानापेक्षयातथैवसुवचत्वात् उर्वरितंत्वग्रिमसूत्रेनिबद्धंअन्यथामुखपदंव्यर्थमेवस्या

**मातुलादयोबंधवोमातृसजातीयाइत्युत्तरः २१ पितामहःपतिपुत्राविति गुरुमुखादेवजा
नीयात् २२ पत्नीपितरौश्वशुरौमातामहाइत्यंतेवासिनः २३ मंदोऽज्यायान्ग्रहेषु २४**

दितिपत्न्यादिषुशुक्रकारकमाह २२ अंतेवासिनःगुर्वग्रेपठिताच्छुक्रात् भार्यामातृपितृश्वशुरश्वश्रूमातामहाविचार्या
इत्यर्थः ननुकारकत्वेनद्वित्रादिग्रहसन्निपातेकमालंब्यविचारइतिसंदेहेकलाधिक्यवतस्तत्रापिसाम्येनिसर्गबलवतः
कार्यइतिरीतिस्तस्माद्ग्रहाणांनिसर्गबलंसूचयति २३ मंदःशनिःसप्तसुग्रहेष्वज्यायांन्दुर्बलः तथाचबृहज्जातके श
कुबुगुशुचराद्यावृद्धितोवीर्यवंतइति तथाचनिसर्गबलेशन्यादयः उत्तरोत्तरंबलिनइत्यर्थः अथचरदशावर्षानयनोपयोगि



For Private and Personal Use Only

तयौजयुग्मराशिभेदेनगणनामुपदिशति २४ विषमभेषुमेषमिथुनादिराशिषुप्राचीवृत्तिः क्रमगणनास्यात् २५ मे
षवृषादिरीत्यागणनास्यादितियावत् उत्तरेषुसमराशिषुवृषकर्कादिषुपरावृत्याव्युत्क्रमेणवृषमेषमीनादिक्रमेणगणनाभ
वतीत्यर्थः अत्रापवादमाह २६ ओजराशिषुक्वचिन्नक्रमःयुग्मराशिषुक्वचिद्व्युत्क्रमोनेत्यर्थः कुत्रेत्याकांक्षायांपरंपराश्रु
तार्थैर्नाचिरंतनैरुक्तंक्रमाद्वृषेवृश्चिकेचव्युत्क्रमात्कुंभसिंहयोरितिसूत्रत्रयफलितार्थसंग्रहस्त्वयंमेषादित्रित्रिभैर्ज्ञेयं पदमो
जपदक्रमात् दशाब्दानयनेकार्यागणनाव्युत्क्रमात्समेप्राचीवृत्तिर्विषमपदेपरावृत्योत्तरेइतिकथंनोक्तमितिचेत् यावदा

**प्राचीवृत्तिर्विषमभेषु २५ परावृत्योत्तरेषु २६ नक्वचित् २७ नाथांताःसमाःप्रायेण २८**

शाश्रयंपदमृक्षाणामितिवक्तव्यत्वात्संदेहभियानोक्तंतथाचमातृधर्मयोः सामान्यंविपरीतमोजकूटयोरितिवक्तव्यत्वा
च्चेति अथतत्तद्राशेर्दशाब्दानयनायावधिंदर्शयति २७ अत्रराशीनांनाथाग्रंथांतरोक्ताग्राह्याः अत्रानुक्तत्वात् तथाहिक्षि
तिजसितज्ञचंद्ररविसौम्यासितावनिजाः सुरगुरुमंदसौरिगुरवश्चगृहांशकपाइति नाथानामवस्थाननैयत्येनचरदशोच्य
तेकुत्रचरदशापदेनव्यवहारइतिचेत् जगतस्तस्थुषोरर्द्धयोगार्द्धेइत्यादौगृहाणअत्रसमाःअब्दानाथांताः तत्तद्राशीनां
तत्तद्राशिनाथाश्रितराशिपर्यंतंग्राह्याः इतिएवंचनाथेद्वितीयेएकाब्दस्तृतीयेद्वौइतिक्रमेणद्वादशेनाथेएकादशाब्दाः त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तद्राशौनाथेसतितुद्वादशाब्दाइतिविवेकः तदुक्तंप्राच्यैः तस्मात्तदीशपर्यंतसंख्यामब्ददशांविदुःवर्षद्वादशकंतत्रनचेदे
कंविनिर्दिशेत् अस्यार्थः तत्तद्राशौनाथेस्थितेसतिद्वादशवर्षाणि (असतितुएकाब्दोग्राह्यइति )अतएवप्रायेणेतिपदेन
नाथांताः समाइत्यस्यापवादःसूचितःप्रायेणेत्यनेनैवस्वामिनउच्चत्वनीचत्वाभ्यामेकैकवर्षवृद्धिन्हासावपिसूचितावेव
वृश्चिककुंभयोर्द्विनाथत्वमपिसूचितमेवतदुक्तंवृद्धैः उच्चखेटस्यसद्भावेवर्षमेकंविनिक्षिपेत् तथैवनोच्चखेटस्यवर्षमेकंवि
शोधयेदितिअत्रवृश्चिककुंभयोर्विशेषोवृद्धैरुक्तःकुजशौरिकेतुराहूराजानावलिकुंभयोः कुजसौरिकेतुराहूयुक्तौतत्रस्थितौ
यदिवर्षद्वादशकंतत्रनचेदेकंविनिर्दिशेत्अयमर्थः वृश्चिकस्यकुजकेतूराजानौनतुतयोरेकैकमपिकुंभस्यशनिराहूराजानौ
नत्वेकैकमपितथाचद्वयोःसत्वेएववर्षद्वादशकं एकैकसत्वेस्वाम्यभावइवोक्तप्रकारेणदशाब्दगणनंकार्यमिति अन्यरा
शौतदुभयसत्वेनाथांताइतिरीतिरनुसर्तव्यातयोर्भिन्नभिन्नराशिगत्वेयएवनाथोबलवांस्तत्संख्याग्राह्या एतदुक्तंवृद्धैः द्वि
नाथक्षेत्रयोरत्रनिर्णयःकथ्यतेधुना एकःस्वक्षेत्रगोन्यस्तुपरत्रयदिसंस्थितः तदान्यत्रस्थितंनाथंपरिगृह्यदशांनयेत् स्वक्षे
त्रेमिलितावेवस्वामीनस्त्वेकशस्तथा एकस्यस्वगृहस्थत्वंनहिकार्योपयोगिकं द्वावप्यन्यर्क्षगौतौचेत्सग्रहोबलवान्भवे
त् ग्रहयोगसमानत्वेचिंत्यंराशिबलाद्बलं चरस्थिरद्विस्वभावाःक्रमात्स्युर्बलशालिनः राशिसत्वसमानत्वेबहुवर्षोबली
भवेत् एकस्वोच्चगतस्त्वन्यःपरत्रयदिसंस्थितःग्राहयेदुच्चखेटस्थंराशिमन्यंविहायवैनाथांताइतिरीत्यायोबहुवर्षवतींदशां

For Private and Personal Use Only

करोतिबहुवर्षोंसौस्वराशेर्दूरगःखगः एवंसर्वसमालोच्यजातस्यनिधनंवदेदितिस्पष्टार्थाःश्लोकाः एकःस्वोच्चेत्यस्यार्थः यदितुबहुवर्षदएकोराजापरक्षेत्रगः अपरस्तुराजाऽन्यक्षेत्रगएवोच्चगोल्पवर्षदस्तदाबहुवर्षदंत्यक्त्वाऽल्पवर्षदमेवोच्चग्रह माश्रित्यनाथांताइति रीत्याऽब्दानयनंकार्यमिति अन्यच्चवृद्धैरुक्तंन्यासयोर्ग्रहहीनत्वेवैकस्यान्येनसयुतौग्राह्याराशिर्ग्र हाभावस्तत्स्वाम्युच्चंगतोयदिएकत्रस्वर्क्षगः खेटश्चान्यत्रद्वौग्रहौयदिग्रहद्वययुतिंहित्वायाह्येत्पूर्वभंसुधीरितिअयमर्थः न्यासयोःलग्नसप्तमयोर्द्वयोःस्थानयोःग्रहाभावेअथवाद्वयोर्मध्येएकस्यान्येनकेनचिद्ग्रहेणस्वेशातिरिक्तेनयुतौसत्यांचत

## यावदीशाश्रयंपदमृक्षाणाम् २९

त्रयोराशिन्यायेननिर्बलःसराशिस्तद्राशीशेउच्चंगतेसतिबलवान्नैवनापरःसग्रहोपिएकत्रराशौस्वक्षेत्रगोग्रहः अपरत्रद्वौ ग्रहौस्तस्तदासस्वामिकराशिरेवबलवानितिद्वितीयपद्यतात्पर्यंउच्चराशयस्तुअजवृषभमृगांगनाकुलीराझषवणिजौच दिवाकरादितुंगाः दशशिखिमनुयुक्तिथींद्रियांशैस्त्रिनवकविंशतिभिश्चतेऽस्तनीचाइतिपंचमेपदक्रमात्प्राक्प्रत्यक्त्वमि तिवक्ष्यमाणसूत्रात्क्रमभेदेनदशालेख्याआरंभावधिस्तुलग्नमेवचरदशायामत्रशुभःकेतुरितिसूत्रादस्यादशायाश्चरदशे तिनामबोध्यम् २८ अथाग्रेफलविशेषज्ञापनायराशीनामारूढापरपर्यायंपदमुपदिशतिऋक्षाणांराशीनांईशाश्रयंयावत्तुई

शाश्रयंराशिपर्यंतंयासंख्यातामीशाश्रयादग्रेप्रणीयतत्संख्यायस्मिन्राशौसमाप्तातद्राशिस्तद्ग्रहस्वामिकराशेःपदस्या दित्यर्थःननुईशाश्रयादग्रेप्रणयेित्यर्थःकथंउच्यतेयावच्चासावीशश्चयावदीशःयावदीशःआश्रयोयस्यतद्यावदीशाश्रयंपद मितिसमासाल्लब्धइतितदेववृद्धैरुक्तंलग्नाद्यावतिथेतिष्ठेद्राशौलग्नेश्वरःक्रमात् ततस्तावतिथंराशिंजन्मारूढंप्रचक्षतेलग्ना ल्लग्नपतिर्यावद्राशिसंस्थस्ततःपुनः तावानृषिभिरारूढःकथितःसर्वशास्त्रतः यदालग्नाधिपोलग्नेसप्तमेवास्थितोयदि आ रूढंलग्नमेवात्रनिर्दिशेत्कालवित्तमः इदंचश्लोकेनलग्नपदंनिरुक्तं पदांतराणामप्युपलक्षणंबोध्यं श्लोकाःस्पष्टार्थाः२९

## स्वस्थेदाराः ३० सुतस्थेजन्म ३१ सर्वत्रसवर्णाभावाराशयश्च ३२

अथारूढोदाहरणरूपंसूत्रद्वयमाह लग्नात्स्वस्थेचतुर्थस्थेलग्नस्वामिनिदाराः सप्तमस्थोराशिर्लग्नारूढंभवति ३० ल ग्नात्सुतस्थेसप्तमस्थेलग्नस्वामिनिजन्मलग्नमारूढंभवतीत्यर्थः यावदीशेतिसूत्रेणैवसिद्धे एतत्सूत्रद्वयमुदाहरणद्वारास्प ष्टार्थंपठितमिति यत्तु आद्यैःस्वस्थेदाराविचारणीयाःसुतस्थेभ्रातृजन्मविचार्यमित्युक्तंतदसंगतमेवप्रतिभातीति ३१ अथात्रभावराशिबोधकपदानामन्यशास्त्रतोवैलक्षण्यमाशंक्याह भावाराशयश्चसवर्णाः वर्णैनसहिताः सवर्णाः एका धिसंख्याबोधकाक्षरगम्याःसर्वत्रग्रंथेननुसिद्धमन्यदितिवक्ष्यमाणत्वात् शिवतांडवादिग्रंथेषुकटपयादिवर्णैःसूचितसं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ख्याप्रसिद्धैवकिमर्थमिदंसूत्रमितिनचभावराशिग्रहसाधारण्येनबोधःस्यादितिवाच्यं भावराशीनांसंख्याप्राधान्यत्वाद्
ग्रहाणांतुग्रहवाचकपदप्राधान्यत्वात्साधारण्येनबोधोनस्यात्किमर्थंसर्वत्रेतिसूत्रमित्याशंक्यवर्णपदराशिपरमेतदिति
प्रकारांतरेणैतत्सूत्रंव्याख्यायते सर्वत्रसवर्णाभावाराशयश्चभावाराशयश्चसवर्णाः वर्णैनवर्णदेनसहिताःसवर्णाभवंति वर्ण
दापनप्रकारस्त्वित्थंवृद्धैरुक्तः ओजलग्नप्रसूतानांमेषादेर्गणयेत्क्रमात् युग्मलग्नप्रसूतानांमीनादेरपसव्यतः मेषमीनादितो
जन्मलग्नांतंगणयेत्सुधीः तथैवहोरालग्नांतंगणयित्वाततःपरं पुंस्त्वेनस्त्रीतयावैतेसजातीयेउभेयदितर्हिसंख्येयोजयीत
वैजात्येतुवियोजयेत् मेषमीनादितःपश्चाद्योराशिःसतुवर्णदः ओजयुग्मलग्नानुरोधेनयोजनशोधनोत्तरंद्वादशाधिकेर
वि १२ तष्टंकृत्वायत्स्थितंतन्मेषमीनादिक्रमव्युत्क्रमगणनयायोराशिर्लभ्यतेसवर्णदराशिरितिबोध्यंहोरालग्नभयोर्नै
या दुर्बलाद्वर्णदादशायत्संख्योवर्णदोलग्नात्तत्तत्संख्याक्रमेणतुक्रमव्युत्क्रमभेदेनदशास्यात्पुरुषस्त्रियोःलग्नाद्यत्संख्या
कोवर्णदराशिस्तत्तत्संख्याक्रमतः ओजयुग्मलग्नानुरोधेनप्रथमप्रवृत्तक्रमव्युत्क्रममर्यादयातत्तद्राशीनांदशास्यादिति
यश्चानाथांताइतिसूत्रेस्वस्वराशेर्नाथांतंवर्षान्यानीतानि तथात्रलग्नादेवस्ववर्णदपर्यंतंवर्षाण्यानेयानीतिमेषमीनादितः
पूर्वोक्तरीत्याधनभावादितत्तद्भावांतगणनांविधायपूर्ववत्करणे तत्तद्भाववर्णदशराशयोभवंतीतिसर्वत्रेतिपदेनसूचितं
नचवर्णदानयनंवर्णददशानयनंचसूत्रार्थान्नयातीतिवाच्यंसिद्धमन्यदितिसूत्रादन्यर्षिशास्त्रप्रसिद्धत्वादवनोक्तंप्राचीनैः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





संगृहीतमिति० गुलिकोपितथैवयथावर्णदोराशिर्लग्नौजत्वयुग्मत्वभेदेनमेषमीनादिगणनयाजन्मलग्नहोरालग्नपर्यंत संख्यावशतः समानीतस्तथैव भावलग्नमेवजन्मलग्नंविभाव्यभाववर्णदराशिरानेयइतिभावलग्नानयनंवृद्धैरुक्तं सूर्योदयंसमारभ्यघटिकानांतुपंचकं प्रयातिजन्मपर्यंतभावलग्नंतथैवच तथासार्द्धद्विघटिकामितात्कालाद्विलग्नभात् प्रयातिलग्नंतन्नामहोरालग्नंप्रचक्षतइतिस्पष्टार्थौश्लोकौहोरालग्नस्पष्टीकरणंतुसार्द्धद्वयघट्याचेत्त्रिंशद्दंशालभ्यंतेतर्हिइष्टघट्याकिमितित्रैराशिकेनज्ञेयंभावलग्नंहोरालग्नंचजन्मलग्नाद्गणनीयमिति होरालग्नानयनेजन्मलग्नेविषमेसतिसूर्यराशितोजन्मलग्नेसमेसतितुजन्मलग्नाद्गणयेत् सूर्योदयमारभ्ययावत्योहोराइष्टकालपर्यंतंजातास्ताःसूर्याल्लग्नाद्वापरिगणनंयां

नग्रहाः ३३

तिमंहोरालग्नंज्ञेयमितिप्राचीनाकारिकातोयमर्थोनायातीतिवर्णदराशितःफलमुक्तंवृद्धैः पापदृष्टिःपापयोगोवर्णदस्य त्रिकोणके यदिस्यात्तर्हितद्राशिपर्यंतंतस्यजीवनं रुद्रशूलेतथैवायुर्मरणादितिरूप्यते तथैववर्णदस्यापित्रिकोणेपापसंगमे वर्णदात्सप्तमाद्राशेःकलत्रादिविचिंतयेत् एकादशादग्रजंतुतृतीयात्तुयवीयसं पंचमेनतुजांविंद्यान्मातरंतुर्यपंचम पितुस्तुनवमान्मातुःपंचमाद्वर्णदस्यतु शूलराशिदशायांवैप्रबलायामरिष्टकं वर्णदराशेःपंचमात्प्रबलशूलदशायांमातुररिष्टंवर्णदराशिनवमात्प्रबलशूलदशायांपितुररिष्टंजानीयादित्यर्थः ३२ अत्रापवादमाह प्रथमपक्षेभावाराशयश्चसव ॥७॥

For Private and Personal Use Only

र्णाःसंख्याबोधकाक्षरगम्याइत्युक्तंग्रहास्तुनप्रसिद्धपदगम्याएवेत्यर्थः द्वितीयपक्षेभावाराशयश्चसवर्णाःवर्णदराशिसहि ताइत्युक्तं ग्रहास्तुवर्णदसहितानतथाचभावराशिवर्णदाभवंतिनग्रहाणामित्यर्थः ३३ अथांतर्दशाविभागंदर्शय ति भानांराशीनांप्रतिराशियेदशाब्दाश्चरस्थिरादिदशासुसिद्धास्तेषांद्वादशविभागेनद्वादशराशीनामावृत्तिर्भवति एवं चद्वादशराशीनांविवेकपदबोध्यचतुश्चत्वारिंशदधिकशतसंख्याभवतीति तदुक्तंप्राच्यैःकृत्वार्कधाराशिदशांराशेर्भुक्ति क्रमाद्वदेत् एवंदशांतर्दशादिकृत्वातेनफलंवदेदिति यत्तुउपस्थिततयादशारंभावधिःस्वस्वलग्नमेवेतिपंथैरुक्तंतन्नहोरा

## यावद्विवेकमावृत्तिर्भानां ३४ होरादयःसिद्धाः ३५

लग्नभयोर्नैयादुर्बलाद्वर्णदादशेतिकारिकोक्तत्वात् एवंप्रतिराशिद्वादशद्वादशाब्दाइतिविवेकसंख्यामहादशाभिप्राये णापिसिद्ध्यतीतिअयमर्थोपिसूत्रसंमतएवएतदभिप्रायेणांतर्दशाविभागोवृद्धैरुक्तः एकैकभावस्यैकैकंवर्षैलग्नादिकल्प येत् सापर्यायदशालग्नेयुग्मेतुव्युत्क्रमाद्वदेत् लग्नंयुग्मंयदातर्हिसम्मुखंतस्यचादिभमितिपर्यायदशाअंतर्दशेति यदाल ग्नंयुग्मराशिस्तदातस्यसंमुखंआदिराशिः यथावृषभस्यमेषइति ३४ प्रकृतशास्त्रेवक्ष्यमाणसूत्रेक्वचिद्धोराद्रेष्काणाद्यपे क्षासत्वेनतदाकांक्षान्निवर्तयन्नाह होराद्रेष्काणादयःसिद्धाःशास्त्रांतरप्रसिद्धमेषादिगणनयाप्रसिद्धाःवत्तुदृष्ट्यर्गलादि

वद्बुता: तदुक्तंवृद्धैः राशेरर्द्धंभवेद्धोराताश्चतुर्विंशतिःस्मृताः मेषादितासांहोराणांपरिवृत्तिद्वयंभवेत् राशित्रिभागाद्रेष्का णास्तेचषट्त्रिंशदीरिताः परिवृत्तित्रयंतेषांमेषादेःक्रमशोभवेत् सप्तांशयास्त्वोजगृहेगणनीयानिजेशतः युग्मराशौतुविज्ञे याःसप्तमर्क्षाधिनायकात् नवांशेशाश्चरेतस्मात्स्थिरेतन्नवमादितः उभयेतत्पंचमादेरितिचिंत्यंविचक्षणैः द्वादशांशस्यग णनांतत्तत्क्षेत्राद्विनिर्दिशेदिति वस्तुतस्तुराशिप्राधान्याद्विलक्षणाएवेतिध्येयम् ३५ इतिश्रीनीलकंठज्योतिर्विद्विरचि तायांजैमिनिसूत्रव्याख्यायांसुबोधिन्यांप्रथमाध्यायस्यप्रथमःपादः॥१॥ अथात्मकारकाश्रयनवांशमालंब्यफलानिवक्त

**अथस्वांशोग्रहाणां १ पंचमूषिकमार्जाराः २ तत्रचतुष्पादः ३ मृत्यौकंडूःस्थौल्यंच ४**

मुपक्रमते अत्रकारकांशमधिक्रोति अथानंतरंग्रहाणांरव्यादीनांमध्येस्वांशः आत्मकारकाश्रितोयोंशोनवांशस्त स्मात्फलंविचार्य्यमित्यर्थः १ कारकाश्रितमेषादिनवांशफलान्याह मेषःकारकांशश्चेन्मूषिकमार्जारादुःखदाःभवंती ति २ वृषःकारकांशश्चेच्चतुष्पादःसुखदाभवंति मूषिकादयोदुःखदाश्चतुष्पादः सुखदाइत्यत्रैकरूपतयार्थोऽपेक्षितः क्व तस्तुभिन्नरूपेणात्रबीजंकिमुच्यते वृद्धवाक्यमेवबीजंवृद्धवाक्यंतुवृषतौल्यंशकगतेतस्मिन्वाणिज्यवान्भवेत् मेषसिंहां शकगतेब्रूयान्मूषकदंशनम् ३ कारकेकार्मुकांशस्थेवाहनात्पतनंभवेदितिमिथुनेकारकांशेकंडूःशरीरस्थौल्यंचभवति ४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्केस्वांशेजलभयंकुष्टरोगभवति ५ सिंहांशश्चेत्श्वापदानिशुनकादयोदुःखदाभवंति ६ कन्याकारकांशश्चेन्मृत्युवन्मिथुनांशवद्भवति अग्निकणश्चअग्निकणेनदुःखदश्चभवति ७ तुलाकारकांशेवाणिज्यवान्स्यात् ८ अत्रवृश्चिकांशेजलसर्पादयोदुःखदाभवंति मातुस्तन्यंदुग्धंचशुष्यति ९ धनुषिकारकांशेवाहनादूर्ध्वप्रदेशाच्चक्रमात्किंचिद्वस्तुसंलग्नतयापतनंभवति नझटितीत्यर्थः १० मकरेकारकांशेजलचरामत्स्यादयः खेचराःपक्षिणः खेटाग्रहाएतेफलदाभवं

दूरेजलकुष्टादिः ५ शेषाःश्वापदानि ६ मृत्युवज्जायाग्निकणश्च ७ लाभेवाणिज्यं ८
अत्रजलसरीसृपास्तन्यहानिश्च ९ समेवाहनादुच्चाच्चक्रमात्पतनं १० जलचरखेचर
खेटकंडूदुष्टग्रंथयश्चरिष्फे ११ तडागादयोधर्मे १२ उच्चेधर्मनित्यताकैवल्यंच १३

ति कंडूदुष्टग्रंथिरोगाश्चभवंति दुष्टग्रंथिर्गंडादिकं ११ कुंभेकारकांशेतडागादयः तडागवापीकूपादिकर्त्तारोभवंति १२ मीनेकारकांशेधर्मनित्यत्वंकैवल्यंमुक्तिश्चभवति कारकस्यांशादिगुणैः फलंवृद्धैःसंगृहीतंशुभराशौशुभांशेवाकारकांशेधनवान्भवेत् तदंशकेंद्रेषुशुभेराजानूनंप्रजायते कारकेशुभराश्यंशेलग्नांशस्थेशुभग्रहे उपग्रहस्यपाश्वात्तेस्वोच्चस्वर्क्षशुभर्क्षगे पापदृग्योगरहितेकैवल्यंतस्यनिर्दिशेत् मिश्रेमिश्रंविजानीयाद्विपरीतेविपर्ययः तदंशकेंद्रेषुकारकाश्रितांश

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुंडल्यांकेंद्रेष्वित्यर्थः पाश्चात्येअंत्यग्रहेइत्यर्थः मिश्रेपापशुभदृग्योगेमिश्रंस्वर्गवासः विपरीतेपापमात्रदृग्योगसाहित्येविपर्ययः नमुक्तिर्नस्वर्गवासइति चंद्रभृग्वारवर्गस्थेकारकेपारदारिकः वृषतौल्यंशकगतेतस्मिन्वाणिज्यवान्भवेत् मेषसिंहांशकेतस्मिन्ब्रूयान्मूषिकदंशनम् कारकेकार्मुकांशस्थेवाहनात्पतनंभवेत् १३ अथकारकांशेग्रहस्थित्यादिना फलान्युपदिशति कारकांशेसूर्येसतिराजकार्यतत्परोभवति १४ कारकांशेपूर्णेदुशुक्रयोःसतोर्भोगीविद्याजीवीचस्या

**तत्ररवौराजकार्यपरः १४ पूर्णेंदुशुक्रयोर्भोगीविद्याजीवीच १५ धातुवादीकौंतायुधोवन्हिजीवीचभौमे १६ वाणिजस्तंतुवायाःशिल्पिनोव्यवहारविदश्चसौम्ये १७ कर्मज्ञाननिष्ठावेदविदश्चजीवे १८ राजकीयाःकामिनःशतेंद्रियाश्चशुक्रे १९ प्रसिद्धकर्माजीवःशनौ २०**

त् १५ कारकांशेभौमेसतिधातुवादीरसायनविद्यावान्बर्छीतिभाषयाप्रसिद्धायुधः वन्हिकृतजीवनवांश्चस्यात् १६ कारकांशेबुधेसतिवणिक्प्रभृतयोभवंति १७ कारकांशेगुरौसतिकर्मनिष्ठादयोभवंति १८ कारकांशेशुक्रेसतिराजाधिकारवंतःबहुस्त्रीस्पृहालवःशतवर्षजीविनश्चभवंति शतंशतवर्षंइंद्रियाणियेषामितिस्वामिनः पंथास्तुशतानिइंद्रियाणियेषामितिवदंति तन्नइंद्रियाणांशतत्वादर्शनात् १९ कारकांशेशनौसतिलोकप्रसिद्धकर्मणाजीवेदित्यर्थः २० कारकां



For Private and Personal Use Only

शेराहौसतिधानुष्काश्चोराश्चस्युः किंवाजांगलिकालोहयंत्रिणश्चस्युः वैकल्पिकमिदंफलद्वयंकथमवगतमितिचेत् मध्ये चकारोपादानादेवअन्यसूत्रेष्वंत्यएवचकारउपात्तः अत्रमध्येकिमर्थमिति २१ कारकांशेकेतौफलमिदं २२ कार कांशेरविराहुस्थित्यासर्पान्मृतिर्भवति २३ शुभग्रहावलोकितेरविराहुयोगेसर्पान्मृतिर्नस्यात् २४ कारकांशगयोः रविराव्होः शुभमात्रयोगेसतिजांगलिकोविषवैद्योभवेत् मात्रशब्देनपापनिवृत्तिः २५ कारकांशगयोरविराव्होःकुज

**धानुष्काश्चोराश्चजांगलिकालोहयंत्रिणश्चराहौ २१ गजव्यवहारिणश्चोराश्च केतौ २२ रविराहुभ्यांसर्पेनिधनं २३ शुभदृष्टेसन्निवृत्तिः २४ शुभमात्रसंबं धाज्जांगलिकः २५ कुजमात्रदृष्टेगृहदाहकःअग्निदोवा २६ शुक्रदृष्टेर्नदाहः २७ गुरुदृष्टेस्त्वासमीपगृहात् २८ सगुलिकेविषदोविषहतोवा २९**

दृष्टौसत्यांस्वगृहदाहकोऽग्निदोवाभवति २६ कारकांशगतरविराव्होःशुक्रदृष्टौसत्यांगृहदाहकोनस्यात् किन्तु अग्नि दानमात्रंकरोतीत्यर्थः २७ कारकांशयोरविराव्होःगुरुदृष्टौसत्यांशुक्रदृष्टावसत्यामासमीपगृहात्समीपगृहपर्य्यंतंदा हःस्यात् नस्वगृहमात्रस्य २८ कारकांशेगुलिकसहितेसतिपरस्मैविषदातावास्वयंविषेणहतोवास्यात् गुलिकान

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यनप्रकारस्तुवृद्धैरुक्तः रविवारादिशन्यंन्तंगुलिकादिनिरूप्यते दिवसानष्टधाकृत्वावारेशाद्गणयेत्क्रमात् अष्टमोंशोनि
रीशःस्याच्छन्यंशोगुलिकःस्मृतः रात्रिमप्यष्टधाभुक्त्वावारेशात्पंचमादितः गणयेदष्टमःखंडोनिष्पत्तिःपरिकीर्तितः श
न्यंशेगुलिकःप्रोक्तोगुर्वंशेयमघंटकः भौमांशेमृत्युरादिष्टोरव्यंशेकालसंज्ञकः सौम्यांशेऽर्द्धप्रहरकःस्पष्टकर्म्मप्रदेशकः
रव्यादिसप्तवारेषुदिनमानमष्टधाविभज्यतत्तद्वारेशंप्रथमखंडाधिपंकृत्वाऽग्रिमखंडेषुतत्तद्वारेशादग्रिमग्रहातक्रमेणेशत्वे
नजानीयादष्टमःखंडस्तुनिरीशः एवंचसप्तसुवारेषुशन्यंशोगुलिकनामा तथाचरविवारेसप्तमः सोमेषष्ठः भौमेपंचमः बु
धेचतुर्थः गुरौतृतीयः शुक्रेद्वितीयः शनौप्रथमः खंडोगुलिकाभवंति सप्तस्वपिवारेषुरात्रिमानमष्टधाविभज्यः तद्वारेशा
त्पंचमाद्याःखंडाधिपाःज्ञेयाः रात्रावप्यष्टमःखंडोनिरीशः एवंचरविरात्रौतृतीयःखंडः सोमेद्वितीयः भौमेप्रथमः बुधे
सप्तमः गुरौषष्ठः शुक्रेपंचमः शनौचतुर्थः खंडोगुलिकोभवंति एवंसर्वेषुदिनेरात्रौचगुरुखंडोयमघंटनामाबुधखंडोऽर्द्ध
प्रहरकाख्यः रव्यंशः कालसंज्ञः भौमांशोमृत्युनामेतिज्ञेयंस्पष्टकर्मइति गुलिकादीनांस्पष्टीकरणंतुस्वस्वदेशल
ग्नप्रमाणानुसारेणतत्तत्खंडकालान्तलग्नानिस्पष्टानिकृत्वागुलिकादिस्पष्टलग्नेकस्यांशोस्तिसएवकारकांशश्चेत्सगुलि
कोजातइतिविवेचनीयम् तथाचसंग्रहः तथाचरविवारादौदिनेगुलिकसंस्थितिः सप्ततुंशरवेदत्रिद्विकुखंडेषुहिक्रमा
त् रात्रौत्रिद्विकुसप्तर्तुपंचतुर्य्येषुतत्स्थितिरिति २९ सगुलिकेकारकांशेचंद्रदृष्टौसत्यांचौरैर्नीतधनःस्वयमेववाचोरः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यात् ३० सगुलिकेकारकांशेऽन्यग्रहादृष्टत्वेसतिबुधदृष्टेस्थूलवृषणोभवति ३१ सगुलिकेइतिपदंनिवृत्तंतत्रकारकांशेनवांशकुण्डल्यांकेतौसतिपापदृष्टेकर्णच्छेदःकर्णरोगोवाभवति ३२ सकेतौकारकांशेशुक्रदृष्टेसतिकयाचिद्यज्ञक्रिययादीक्षितःस्यात् ३३ सकेतौकारकांशेबुधशनिदृष्टेनपुंसकःस्यात् ३४ सकेतौकारकांशेबुधशुक्रदृष्टेपुनः पुनरुक्तवचनवक्तादासीपुत्रोवास्यात् ३५ सकेतौकारकांशेखेटांतरेणदृष्टेपिशनिदृष्टेतपस्वीप्रेष्योवास्यात् ३६ सकेतौकारकां

**चंद्रदृष्टौचोराऽपहृतधनश्चोरोवा ३० बुधमात्रदृष्टेबृहद्बीजः ३१ तत्रकेतौपापदृष्टेकर्णच्छेदःकर्णरोगोवा ३२ शुक्रदृष्टेदीक्षितः ३३ बुधशनिदृष्टेनिर्वीर्य्यः ३४ बुधशुक्रदृष्टेपौनःपुनिकोदासीपुत्रोवा ३५ शनिदृष्टेतपस्वीप्रेष्योवा ३६ शनिमात्रदृष्टेसंन्यासाभासः ३७तत्ररविशुक्रदृष्टेराजप्रेष्यः ३८ रिःफेबुधेबुधदृष्टेवामन्दवत् ३९ शुभदृष्टेस्थेयः४०**

शेखेटांतरेणादृष्टेसन्यासाभासः नपूर्णसन्यासइत्यर्थः केतावितिनिवृत्तम् ३७ कारकांशेरविशुक्राभ्यांदृष्टेराजभृत्योभवति ३८ अथकारकांशाद्दशमांशमवलंब्यविचारयति कारकांशाद्दशमेबुधेसतिबुधदृष्टेवासतिमंदवत्शनिवत् प्रसिद्धकर्माजीवः शनावितिसूत्रोपात्तंफलंभवति ३९ कारकांशाद्दशमेबुधेतरशुभग्रहदृष्टेस्थिरोभवति नचंचलः बुधेत

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रशुभदृष्टत्वं कथंज्ञातामेतिचेत् बुधदृष्टिफलस्योक्तत्वादेव ४० कारकांशदशमेरवौसतिखेटांतरादृष्टेगुरुमात्रदृष्टेगोरक्षकोभवति कारकांशाच्चतुर्थफलमाह ४१ कारकांशाच्चतुर्थेंशेचन्द्रशुक्रदृष्टियोगाभ्यांप्रासादवान्भवति ४२ कारकांशाच्चतुर्थस्थितेउच्चराशिगतग्रहेपिप्रासादवान्भवति ४३ कारकांशाच्चतुर्थस्थितेराहुशनिभ्यांशिलांनिर्मितंगृहंभवति ४४ इदंसूत्रत्रयंराहुशनिभ्यामितिसूत्रेणैवकृतव्याख्यानम् अथकारकांशान्नवमांशफलमाह ४५ ४६ ४७

**रवौगुरुमात्रदृष्टेगोपालः ४१ दारेचन्द्रशुक्रदृग्योगात्प्रासादः ४२ उच्चग्रहेपि ४३ राहुशनिभ्यांशिलागृहं ४४ कुजकेतुभ्यामैष्टकम् ४५ गुरुणादारवं ४६ तारणंरविणा ४७ समेशुभदृग्योगाद्धर्मनित्यःसत्यवादीगुरुभक्तश्च ४८ अन्यथापापैः ४९ शनिराहुभ्यांगुरुद्रोहः ५० गुरुरविभ्यांगुरावविश्वासः ५१ तत्रभृग्वंगारकवर्गेपारदारिकः ५२**

कारकांशान्नवमेशुभदृष्टियोगाभ्यांधर्मनिरतत्वादिमान्भवति ४८ नवमेपापदृष्टियोगाभ्यांधर्मनित्यत्वादिरहितोभवति ४९ नवमस्थाभ्यांशनिराहुभ्यांतत्दृष्टृभ्यांवागुरुद्रोहः ५० नवमेगुरुरविदृग्योगाभ्यांगुरावविश्वासोभवति ५१ कारकांशान्नवमेशुक्रभौमान्यतरषड्वर्गेसतिपरस्त्रीसक्तःस्यात् ५२ नवमेशुक्रभौमान्यतरषड्वर्गेसतिषड्वर्गापेक्षया



For Private and Personal Use Only

ऽधिकाभ्यांशुक्रभौमदृष्टियोगाभ्यांमरणपर्यंतंपारदारिकोभवति ५३ कारकांशान्नवमेकेतोर्दृष्टियोगाभ्यांप्रतिबन्धः
आमरणंपारदारिकत्वस्यनिवृत्तिर्भवति ५४ नवमस्थितेनवमद्रष्ट्रावागुरुणास्त्रीलोलः ५५ नवमस्थेननवमद्रष्ट्रावाराहु
णापरस्त्रीसंगनिवृत्तिर्द्रव्यनाशःस्यात् ५६ अथकारकांशात्सप्तफलमाह अत्रदक्पदंनिवृत्तं नवमप्रकरणस्यसमाप्तत्वा
त् कारकांशात्सप्तमेचंद्रगुर्वोर्योगेसतिस्त्रीसुंदरीभवति ५७ सप्तमेराहुयोगेविधवास्त्रीगृहेभवति ५८ स्पष्टं ५९ अल

दृग्योगाभ्यामधिकाभ्यामामरणं ५३ केतुनाप्रतिबन्धः ५४ गुरुणास्त्रैणः ५५
राहुणार्थनिवृत्तिः ५६ लाभेचन्द्रगुरुभ्यांसुंदरी ५७ राहुणाविधवा ५८ शनिनाव
योधिकारोगिणीतपस्विनीवा ५९ कुजेनविकलांगी ६० रविणास्वकुलेगुप्ताच
६१ बुधेनकलावती ६२ चापेचंद्रेणानावृत्तेदेशे ६३ कर्मणिपापेशूरः ६४

क्षणांगीत्यर्थः ६० सप्तमेरवियोगेस्वकुलेभर्तृकुलेगुप्तारक्षितास्थितास्यादामरणंनतुस्वातंत्र्येणेतस्ततोऽटनशीलाचका
राद्विकलांगीच ६१ गीतवाद्यादिषुकुशला ६२ कारकांशाच्चतुर्थेचंद्रेसतिपूर्वोक्तयोगेषुसत्सु अनाच्छादितेदेशेप्रो
क्तस्त्रीप्रथमसंगइत्यर्थः कारकांशात्सप्तमेधनुषिचंद्रेइतिवार्थः ६३ कारकांशात्तृतीयफलमाह कारकांशात्तृतीयेपापेस

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिशुरःस्यात् ६४ तृतीयेशुभेकातरःतृतीयषष्ठयोःफलमाह ६५ कारकांशात्तृतीयषष्ठयोर्द्वयोरपिसपापत्वेकृषीवलः स्यात् ६६ नवमेगुरौविशेषेणकृषीवलः अथकारकांशाद्द्वादशेफलमाह ६७ द्वादशेशुभेसतिशुभलोकप्राप्तिः ६८ कारकांशेशुभेसतिमुक्तिरित्यर्थः अथवाकारकांशातद्द्वादशेकेतौसतिमुक्तिरितिवार्थः ६९ कारकांशेमेषेधनुषिवातत्र शुभसेतिविशेषेणमुक्तिःसायुज्यमुक्तिरित्यर्थः अथवामेषेधनुषिवाद्वादशेकेतौसतिसायुज्यमुक्तिरितिवस्तुतस्तुशुभापेक्ष

**शुभेकातरः ६५ मृत्युचिंतयोःपापेकर्षकः ६६ समेगुरौविशेषेण ६७ उच्चेभुभेशुभलोकः ६८ केतोकैवल्यं ६९ क्रियचापयोर्विशेषेण ७० पापैरन्यथा ७१ रविकेतुभ्यांशिवे भक्तः ७२ चंद्रेणगौर्य्यां ७३ शुक्रेणलक्ष्म्यां ७४ कुजेनस्कंदे ७५**

याकेतोः सायुज्यमुक्तिदातृत्वायोग्यत्वात्प्रथमव्याख्यैवसमुचितेतिबोध्यं नचसूत्रकारेणकेतोः शुभत्वमुक्तंकेतोश्चेच्छु भत्वंस्यात्तर्हिचरदशायामत्रशुभःकेतुरितिवक्ष्यमाणसूत्रोत्तरदशायामेवशुभःकेतुरन्यत्रनेत्यर्थोवगम्यतइति ७० कारकांशातद्द्वादशेकारकांशेचपापयोगेननशुभलोकोनमुक्तिरित्यर्थः ७१ अमात्यदासेचैवमितिपर्यंतंकेताविति पदमनुवर्त तेकारकांशेरविकेतुभ्यांमिलिताभ्यांस्थिताभ्यांशिवेभक्तिर्भवति अग्रेप्येवमेवयोजना ७२ एवंस्पष्टम् ७३ ७४ ७५



For Private and Personal Use Only

७६ ७७ ७८ तामस्यांभूतादिदेवतायांचेति ७९ कारकांशेपापराशौशनौसतिकर्णपिशाचादिषुभक्तिः ८० कारकांशेपापराशौशुक्रेतथैव ८१ आत्मकारकग्रहान्न्यूनांशोग्रहः अमात्यस्तस्माद्योदासोरन्यादिगणनयाषष्ठोग्रह स्तस्मिन्पापर्क्षेकारकांशेसतिक्षुद्रदेवताभक्तिरित्यर्थः पंथास्तु अयमर्थःसूत्रंसंमतश्चेत्पापर्क्षेमंदशुक्रामात्यदासेषुक्षुद्रदेव तास्थितिसूत्रंप्रणीतंस्यादितिवदंति तन्न एवंचेन्मंदशुक्रामात्यदासेषुमिलितेषुपापर्क्षेसत्सुक्षुद्रदेवताभक्तिरित्यर्थःस्या

**बुधशनिभ्यांविष्णौ ७६ गुरुणासांबशिवे ७७ राहुणातामस्यांदुर्गायांच ७८ केतुना गणेशेस्कंदेच ७९ पापर्क्षेमंदेक्षुद्रदेवतासु ८० शुक्रेच ८१ अमात्यदासेचैवम् ८२ त्रिकोणेपापद्वयेमांत्रिकः ८३ पापदृष्टेनिग्राहकः ८४ शुभदृष्टेनुग्राहकः ८५**

त् भवतितुएतेषामन्यतरस्यापिपापर्क्षस्थित्याक्षुद्रदेवताभक्तिस्तस्माद्योगविभागएवोचितइति ८२ कारकांशात्पंच मनवमयोःपापद्वयेक्रमेणस्थितेसतिमांत्रिकः मंत्रवेत्ताभवति ८३ त्रिकोणद्वयेसपापेपापदृष्टोभूतादीनांनिग्रहकर्ता स्यात् ८४ त्रिकोणद्वयेशुभदृष्टेनुग्राहकःत्रिकोणेसपापेशुभदृष्टेऽनुग्राहकः लोकेषुअनुग्रहकर्तास्यात् ८५ ॥ ७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारकांशेचंद्रेशुक्रदृष्टेसतिरसवादीभवति ८६ शुक्रेंदौबुधदृष्टेसतिवैद्योभवति ८७ कारकांशाच्चतुर्थेचंद्रेशुक्रदृष्टेसति श्वेतकुष्ठीभवति ८८ चापगेचंद्रेकुजदृष्टेमहारोगःकुष्ठीभवति ८९ अर्थःप्राग्वत् ९० कारकांशाच्चतुर्थेपंचमेवायथायो गंकुजराहूचेत्तस्तर्हिक्षयरोगोभवति ९१ उक्तस्थानगयोःकुजराह्वोश्चंद्रदृष्टौसत्यांनिश्चयेनक्षयरोगः चंद्रदृष्ट्यभावे

शुक्रेंदौशुक्रदृष्टेरसवादी ८६ बुधदृष्टेभिषक् ८७ चापेचंद्रेशुक्रदृष्टेपांडुश्वित्री ८८ कुजदृष्टेमहारोगः ८९ केतुदृष्टेनीलकुष्ठम् ९० तत्रमृतौवाकुजराहुभ्यांक्षयः ९१ चंद्रदृष्टौनिश्चयेन ९२ कुजेनपिटकादिः ९३ केतुनाग्रहणीजलरोगोवा ९३ राहुगुलिकाभ्यांक्षुद्रविषाणि ९४ तत्रशनौधानुष्कः ९५ केतुनाघटिकायंत्री ९६ बुधेनपरमहंसोलगुडीवा ९७ राहुणालोहयंत्री ९८ रविणाखड्गी ९९ कुजेनकुंती १००

क्षयःस्वल्पःचंद्रदृष्टौप्रबलइतिभावः ९२ तत्रमृतौवास्थितेनकुजेनपिटकादिर्भवति ९३ तत्रमृतौवाकेतुश्चेत्संग्रहणीजलोदराद्यारोगाभवन्ति ९३ तत्रमृतौवाराहुगुलिकौयदितर्हिमूषिकादिविषाणिभवंति ९४ मृताविति निवृत्तं कारकांशेचतुर्थेशनौधनुषिनिपुणः ९५ तत्रकेतुश्चेत्घटिकायंत्रीभवति ९६ तत्रबुधेसतिपरमहंसोलगुडीवा अ



For Private and Personal Use Only

त्रसर्वत्रापितत्रेतिपदमन्वेति ९७ ९८ ९९ १०० कारकांशेतत्पंचमांशेवायथायोगंचंद्रगुरुचेद्ग्रंथकर्ताभवति १०१ कारकांशेतत्पंचमेवाचंद्रशुक्राभ्यांकिंचिदूनंग्रंथकर्तृत्वंस्यात् ननुअयमर्थस्त्वयाकथंलब्धइतिचेत्केवलशुक्रे णाग्रेफलस्यवक्तव्यत्वात् नचग्रंथकर्तृत्वेकिंचिदूनत्वंकव्यादित्वंचभवतीतिवाच्यं एवंचेत्शुक्रेणकिंचिदूनंग्रंथकृत्क विर्वाग्मीकाव्यज्ञश्चेतिसूत्रप्रणीतंस्यात् तस्मादयमेवार्थः सूत्रसंमतः नचसमासांतः पतितपदानामेकांशानुवृत्तेरनौ

**मातापित्रोश्चंद्रगुरुभ्यांग्रंथकृत् १०१ शुक्रेणकिंचिदूनं १०२ बुधेनततोपि १०३**
**शुक्रेणकविर्वाग्मीकाव्यज्ञश्च १०४ गुरुणासर्वविद्ग्रंथिकश्च १०५ नवाग्मी १०६**
**विशिष्यवैयाकरणोवेदवेदांगविच्च १०७ सभाजडःशनिना १०८ बुधेनमीमांसकः**
**१०९ कुजेननैयायिकः ११० चंद्रेणसांख्ययोगज्ञःसाहित्यज्ञोगायकश्च १११**

चिंत्यमितिवाच्यं अस्मिन्ग्रंथेत्वियंरीतिरस्त्येवेति १०२ कारकांशेतत्पंचमेवाचंद्रबुधाभ्यांशुक्रयोगापेक्षयापिन्यून ग्रंथकर्तृत्वंस्यात् १०३ मातापित्रोरेकत्रानुक्तयोगेकव्यादिःस्यात् १०४ अर्थःपूर्ववत् १०५ वक्तृत्वंनेत्यर्थःपुनर पिगुरोरेवफलमाह १०६ स्पष्टम् १०७ उक्तस्थानगेनमंदेनसभाजाड्यं १०८ स्पष्टम् १०९ स्पष्टम् ११० स्पष्टम् १११

स्पष्टं १ १ १ सूत्रंस्पष्टम् १ १ २ पूर्वोक्तयोगेगुरुदृष्टिगुरुषड्वर्गसंबंधेसतितत्तच्छास्त्रसंप्रदायज्ञोभवति १ १ ३ कारकांशा त्द्वितीयेपिचंद्रगुर्वादिपूर्वोक्तयोगेनग्रंथकर्तृत्वादिपूर्वोक्तंफलंस्यादित्यर्थः १ १ ४ कारकांशात्तृतीयेपिपूर्वोक्तग्रहयोगे नग्रंथकर्तृत्वादिफलमूह्यमित्येके १ १ ५ कारकांशात्द्वितीयेकेतौपापदृष्टेसति स्तब्धवाककिंचित्संलग्नवचनः किंवाप्र त्युत्तरदानेझटित्यसमर्थवाणीकःस्यात्. १ १ ६ स्वीयजन्मलग्नाज्जन्मलग्नारूढाद्वाद्वितीयाष्टमयोराश्योःकेवलौपा

**रविणावेदांतज्ञोगीज्ञश्च १ १ १ केतुनागणितज्ञः १ १ २ गुरुसंबंधेनसंप्रदायसिद्धिः १ १ ३ भाग्येचैवं १ १ ४ सदाचैवमित्येके १ १ ५ भाग्येकेतौपापदृष्टेःस्तब्धवाक् १ १ ६ स्वपि तृपदाद्भाग्येरोगयोःपापेसाम्येकेमद्रुमः १ १ ७**

पौस्तः सग्रहत्वेपिशुभपापान्यतरैकग्रहत्वेनद्वियहव त्वादिनासमसंख्यौचेत्स्तस्तदाकेमद्रुमयोगोभवति ननुस्वशब्देनकारकांशबोधःकथंनउच्यते स्वशब्दकारकांशबोध कश्चेत्पितृपदादितिवाक्यादेवतल्लाभेपुनरुपादानंव्यर्थंस्यात् स्वशब्दाभावेपितृपदात्कारकांशात्कारकांशारूढादयम र्थःस्यात् अपेक्षितस्तुजन्मलग्नाल्लग्नारूढाद्वेति स्वशब्देनतुस्वीयलग्नाल्लग्नारूढाद्वेत्यर्थोभवतीति अयमेवार्थः परंपराश्रु तत्वात्प्राचीनैरुक्तः आरूढाज्जन्मलग्नाद्वापापौस्त्रीहानिगौयदि केवलौसग्रहत्वेपिसमसंख्यौशुभाशुभौ चंद्रदृष्टौ ॥१४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषेणयोगःकेमद्रुमोमतइति यत्तुकारकलग्नारूढेभ्यइतिस्वामिभिरुक्तं तद्वृद्धसंमतंनेति ११७ प्रोक्तयोगेसतिद्दिती याष्टमयोश्चंद्रदृष्टौसत्यांविशेषेणकेमद्रुमोदरिद्रयोगोभवति ननुपूर्वोक्तफलानिकिंसर्वदाभवंति आहोस्वित्कालावि शेषेइत्याह ११८ सर्वेषांराशीनांपाकेदशायांएवंपूर्वोक्तानिफलानिभवंति अथवासर्वेषांराशीनांपाकेचदशारंभका लेपिएवंपूर्वोक्तकेमद्रुमयोगविचारःकार्यः केमद्रुमेसतिदशायांदारिद्र्यंस्यादिति ११९ इतिजैमिनिसूत्रप्रथमाध्याय स्यद्वितीयपादव्याख्यानं ॥२॥ ॥७॥ अथारूढकुंडलीग्रहानवलंब्यफलानिवक्तुंपदमधिकरोति अथैतदनंतरंयावदीशा

**चंद्रदृष्टौविशेषेण ११८ सर्वेषांचैवपाके ११९ ॥ ७॥ अथपदं १ व्ययेसग्रहे ग्रहदृष्टेश्रीमंतः २ शुभैर्न्याय्योलाभः ३ पापैरमार्गेण ४ उच्चादिभिर्विशेषात् ५**

श्वयंपदमृक्षाणामितिसूत्रलक्षितमारूढापरपर्यायंपदमधिक्रियते अथैकादशस्थानफलमाह १ लग्नपदादेकादशेसग्रहे ग्रहांतरदृष्टेसतिलक्ष्मीवंतोभवंति २ एकादशस्थाग्रहाएकादशद्रष्टारश्चग्रहायदिशुभास्तर्हिन्यायमार्गाल्लाभःस्यात् ३ पापग्रहाश्चेदेकादशस्थाद्रष्टारश्चतर्ह्यमार्गेणशास्त्रविरुद्धमार्गेणलाभोमिश्रैर्मिश्रोलाभइतिज्ञेयम् ४ उच्चस्वगृहादिस्थग्र हयोगादिनाविशेषप्राप्तिः उच्चादिगुणवद्ध्यांशुभपापाभ्यांन्यायादन्यायाच्चविशेषतोलाभइत्यर्थः वृद्धैरप्युक्तम् आरूढा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्लाभभवनंग्रहःपश्येत्तुनव्ययम् यस्यजन्मनिसोपिस्यात्प्रबलोधनवानपि द्रष्टृग्रहाणांबाहुल्येतदाद्रष्टरितुंगगे सार्गलेचा पितत्रापिबव्हर्गलसमागमे शुभग्रहार्गलेतत्रतत्राप्युच्चग्रहार्गले सुखानिस्वामिनादृष्टेलग्नभाग्याधिपोनवा जातस्यपुंसः प्राबल्यंनिर्दिशेदुत्तरोत्तरमिति कोपिग्रहोयदिद्वादशंनपश्यतीति ५ अथपदातद्वादशफलमाह द्वादशेग्रहसत्वेग्रहांतरदृष्टौभूयान्व्ययइत्यर्थः शुभग्रहेसद्व्ययः पापेसद्व्ययइति ६ पदात्द्वादशेरविराहुशुक्रैर्व्यस्तैःसमस्तैर्वाराजमूलोव्ययः

**नीचग्रहदृग्योगाद्व्ययाधिक्यम् ६ रविराहुशुक्रैर्नृपात् ७ चंद्रदृष्टौनिश्चयेन ८ बुधेनज्ञातिभ्योविवादाद्वा ९ गुरुणाकरमूलात् १० कुजशनिभ्यांभ्रातृमुखात् ११ एतैर्व्ययएवंलाभः १२ लाभेराहुकेतुभ्यामुदररोगः १३**

स्यात् ७ द्वादशगेरव्यादौचंद्रदृष्टिश्चेन्निश्चयाद्राजमूलोव्ययः चंद्रदृष्ट्यभावेतुसंदिग्धइति ८ बुधेद्वादशगेज्ञातिनिमित्तात्झटकाद्वाद्रव्यव्ययः९ गुरुर्द्वादशेचेत्करव्याजेनव्ययः१० द्वादशेकुजशनीचेद्भ्रात्रादिद्वाराव्ययः अथैकादशेलाभंव्ययवदतिदिशति ११ एतैर्द्वादशस्थानपठितैर्ग्रहैर्यथाव्ययउक्तस्तथातैरेवैकादशगैस्तेनैवप्रकारेणलाभोपिभवतीत्यर्थः अथपदात्सप्तमेफलमाह १२ पदात्सप्तमेराहुकेत्वोरन्यतरेणोदररोगःस्यात् अथपदाद्वितीयस्थकेतोःफलमाह १३



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रपदात्द्वितीयेकेतुयोगेनशीघ्रमेबवार्द्धक्यचिन्हानिभवंति यत्तु स्वास्यादिभिर्लाभपदानुवृत्त्या तत्रसप्तमेइत्युक्तम् तन्न एवंचेत्तर्हिकेतुनाझटितिज्यानिलिंगानीतिसूत्रंप्रणीतंस्यात्तत्रेतिकिमर्थामिति अन्यच्चचंद्रगुरुशुक्रेषुश्रीमंतइतिव क्तव्यत्वात्सप्तमस्यधनविचाराश्रयत्वाभावादिति तदुक्तंवृद्धैः आरूढात्षष्टमेपापेचोरःस्याच्छुभवर्जिते षष्ठभेद्वितीये आरूढाद्वापिसौम्येतुसर्वदिश्यधियोभवेत् सर्वज्ञस्तत्रजीवेस्यात्कविर्वादीचभार्गवे वापिद्वितीयेइत्यर्थः १४ पदात्

**तत्रकेतुनाझटितिज्यानिलिंगानि १४ चंद्रगुरुशुक्रेषुश्रीमंतः १५ उच्चेनवा १६ स्वांशवदन्यत्प्रायेण १७ लाभपदेकेंद्रेत्रिकोणेवाश्रीमंतः १८ अन्यथादुःस्थे १९ केंद्रेत्रिकोणोपचयेषुद्वयोर्मैत्री २०**

द्वितीयेव्यस्ततयासमस्ततयावाचंद्रादिषुसत्सुश्रीमंतोभवंति १५ द्वितीयस्थितेनशुभपापान्यतरग्रहेणोच्चस्थितेनवा श्रीमंतइत्यर्थः १६ अन्यदत्रानुक्तंफलंकारकांशवद्बोध्यं प्रायेणेत्युक्त्यानसर्वत्रकारकांशवत्फलं औपदेशिकशास्त्राविरुद्धस्यातिदेशिकशास्त्रस्याप्रवृत्तेरिति १७ लग्नारूढात्केंद्रेत्रिकोणेवालाभपदेलग्नात्सप्तमारूढेसतिलक्ष्मीवंतोभवंति १८ लग्नारूढात्सप्तमारूढेदुःस्थेषष्ठाष्टमव्ययस्थेसत्यन्यथास्युः श्रीमंतोनेत्यर्थः १९ लग्नपदात्सप्तमपदेकेंद्रेत्रिकोणोपचयगेसतिद्वयोर्भार्याभर्त्रोर्मैत्रीभ

For Private and Personal Use Only

वति एवंलग्नपदात्पुत्रादिभावपदेकेंद्रेत्रिकोणोपचयगेसतितयोस्तयोर्मैत्रीज्ञेया अत्रोपचयपदंषष्ठातिरिक्तपदंरिपुरोग
चिंतासुवैरमितिवक्तव्यत्वात् २० लग्नपदात्तद्भावपदेषष्ठाष्टमव्ययगेसतितयोस्तयोर्वैरंभवतिलाभपदइत्यादिसूत्र
चतुष्टयंवृद्धैः संगृहीतंलग्नारूढंदारपदंमिथः केंद्रगतंयदि त्रिलाभेवात्रिकोणेवातथाराजान्यथाधमः आरूढौपुत्रपित्रो
स्तुत्रिलाभकेंद्रगौयदि द्वयोर्मैत्रीत्रिकोणेतुसाम्यंद्वेषोन्यथाभवेत् एवंदारादिभावानामपिपत्यादिमित्रता जातकद्वयमा
लोक्यचिंतनीयंविचक्षणैरिति २१ पत्नीलाभयोर्लग्नपदतत्सप्तमयोर्निराभासार्गलयानिष्प्रतिबंधार्गलयादिष्ट्याभा

## रिपुरोगचिंतासुवैरं २१ पत्नीलाभयोर्दिष्ट्यानिराभासार्गलया २२ शुभार्गलेधनसमृद्धिः २३

ग्यंभवति दिष्टयेत्याकारांतःशब्दः दिष्ट्यासमुपजोषंचेत्यानंदेइत्यमरः अथवादिष्टमेवदिष्टचंदिष्टंभागधेयंयेषांतेदि
ष्ट्याः भाग्यवंतइत्यर्थः अत्रप्राचीनैरुक्तम् यस्यपापःशुभोवापिग्रहस्तिष्ठेच्छुभार्गले तेनद्रष्ट्रेक्षितंलग्नंप्राबल्यायोपक
ल्पते यदिपश्येद्ग्रहस्तन्नविपरीतार्गलस्थितइति पत्नीलाभयोरितिभाग्ययोगेसिद्धेपदरूपलग्नगतदृष्टचातस्यैवभा
ग्यप्राबल्यरूपोगुणोऽनेनविज्ञापितइतिविशेषः २२ पदसप्तमयोःशुभैरेवयद्यर्गलंतर्हिधनंबहुवर्द्धते एतेनपापार्गलेनध
नभवंति शुभग्रहार्गलेततोपिविशेषइत्यर्थः पूर्वसूत्रेशुभपापसाधारण्येनविपरीतार्गलंविनिर्मुक्तार्गलस्यधनादिसत्व



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लक्षणभाग्ययोगः फलमित्युक्तम् अस्मिन्सूत्रेतुशुभमात्रघटितेधनवृद्धिः सार्वदिकीपापमात्रघटितेधनवत्वमात्रंपाप शुभोभयघटितेकदाचिद्धनसमृद्धिः कदाचिद्धनवत्त्वेवेति ननुभयपुण्येतिश्लोकोक्तशुभपापसाधारणविपरीतार्गलभिन्न शुभार्गलमेवात्रशुभार्गलत्वेनकुतोनगृह्यतइतिचेत् उच्यतेसूत्रद्वयेएकरूपाचेदर्गलात्तर्हिपूर्वेणैवसिद्धेशुभार्गलंइतिसूत्र स्यवैयर्थ्यापत्तेरितिभावः नचभाग्यवत्त्वधनवत्त्वभेदादितिवाच्यम् धनंविनाभाग्यवत्ताऽप्रतीतेरित्पलम् २३ जन्म लग्नंप्रसिद्धम् काललग्नंहोरालग्नंघटिकाघटिकालग्नम् एतेषुत्रिष्वपिकेनचिदेकेनग्रहेणदृष्टेषुराजानोभवंतिअत्रैकग्रह

## जन्मकालघटिकास्वेकदृष्टासुराजानः २४ पत्नीलाभयोश्चराश्यंशकदृक्काणैर्वा २५

दृष्टिविषयत्वमपेक्षितंनत्वेकग्रहमात्रदृष्टत्वं काललग्नानयनंप्रागुक्तम् घटिकालग्नानयनंतुवृद्धैरुक्तम् लग्नादेकघटीमात्रं यातिलग्नंदिनेदिने परंतुघटिकालग्नंनिर्दिशेत्कालवित्तमइति स्पष्टार्थः २४ जन्मराशिकुंडलीनवांशकुंडलीदृक्काण कुंडलीषुलग्नसप्तमयोर्द्वयोरपिएकग्रहदृष्टयोःसतोःराजानोभवंति द्रेष्काणानयनंराशित्रिभागाइतिपूर्वमुक्तम् तथाचकुं डलीत्रयभेदेनलग्नसप्तमद्वयगणनयाषट्संपद्यंतेषट्स्वपिएकगृहदृष्टौराजयोगःपूर्णइत्यर्थः राशिर्जन्मकालेचंद्राक्रां तराशिर्नतुलग्नमिति २५ राजयोगद्वयेपिकिंचिद्वैकल्यपरमिदंसूत्रंताश्चतानिच तानितेषुराश्यंशकदृक्काणेषुजन्मका

For Private and Personal Use Only

लघटिकासुच एकस्मिन्नेकग्रहदृष्ट्याद्यूनेसतिद्वयोर्लग्नयोरेकदृष्टयोःसतोःन्यूनराजत्वमित्यर्थः एतदुक्तंवृद्धैः वि
लग्नघटिकालग्नहोरालग्नानिपश्यति उच्चगृहेराजयोगोलग्नद्वयमथापिवा राशेर्दृक्काणतोंशाच्चराशेरंशाद्दथापिवा
यद्वाराशिदृक्काणाभ्यांलग्नद्रष्टातुयोगदः प्रायेणायंजातकेषुप्रभुणामेवदृश्यते वाक्यांतरंच जन्मकालघटीलग्नेष्वेकेनै
वेक्षितेषुतु उच्चारूढेत्तुसंप्राप्तेचंद्राक्रांतेविशेषतः क्रांतेवागुरुशुक्राभ्यांकेनाप्युच्चग्रहेणवा दुष्टार्गलमहाभावेराजयोगोन
संशयइति जन्मेतिसूत्रोक्तंराजयोगमंशदृक्काणयोरतिदिशति २६ यथाजन्मेतिसूत्रेजन्मलग्नकुंडल्यासहहोराघटिका

**तेष्वेकस्मिन्नद्यूनेन्यूनं २६ एवमंशतोदृक्काणतश्च २७ शुक्रचंद्रयोर्मिथोदृष्टयोः सिंहस्थयोर्वायानवंतः २८**

कुंडल्योःसमुच्चयस्तथैवांशकुंडल्यादृक्काणकुंडल्याचपृथक्पृथक्का
लघटिकाकुंडल्योःसमुच्चयेतथाचलग्नकालघटिकासु अंशकालघटिकासुदृक्काणकालघटिकासुचैकदृष्टासुराजानइति
राजयोगत्रयंसिद्ध्यति राजयोगांतरंग्रंथांतराद्वृद्धैःसंगृहीतं निशार्द्धाच्चदिनार्द्धाच्चपरंसार्द्धद्विनाडिका शुभातदुद्भवोरा
जाधनीवातत्समोपिवेति २७ अथयानयोगमाह शुक्रचंद्रौयत्रक्वचिद्विद्यमानौयादिपरस्परंदृष्टिभाजौतर्हियानवंतो
भवंति एवंशुक्रचंद्रावेवयदिसिंहस्थौतृतीयगौशुक्राच्चंद्रेतृतीयगेचंद्राच्छुक्रेवातृतीयगेसत्यपियानवंतइतिगोलार्थः त



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुक्तंवृद्धैः चंद्रःकर्विकविश्वंद्रंपश्यत्यपितृतीयगे शुक्राच्चंद्रेततःशुक्रेतृतीयेवाहनार्थवान् २८ शुक्रादिषुमिथोदृष्टिमत्सु परस्परंतृतीयस्थेषुवावितानादिराजचिन्हवंतोभवंति २९ आत्मकारकाद्राश्यादिनाद्वितीयचतुर्थपंचमभावतुल्येषु शुभग्रहेषुराजानोभवंति एवंचततत्कारकवशात्तेषांतेषामपिफलमूह्यं तस्मात्पुत्रादिकारकेष्वपिराजयोगबलेपुत्रादी नामपिराजत्वंवाच्यम् ३०आत्मकारकात्तृतीयषष्ठभावसमयोःपापयोश्चराजानोभवंति कारकेनिरुक्तंयोगद्वयंलग्न

शुक्रकुजकेतुषुवैतानिकाः २९ स्वभाग्यदारमातृभावसमेषुशुभेषुराजानः ३० कर्म दासयोःपापयोश्च ३१ पितृलाभाधिपाच्चैवं ३२ मिश्रेसमाः ३३ दारिद्राविपरीते ३४

सप्तमाधिपयोरतिदिशति ३१लग्नाधिपात्सप्तमाधिपाच्चैवंद्वितीयचतुर्थपंचमभावसमयेषुशुभेषुतृतीयषष्ठभावसमयोः पापयोश्चराजानइत्यर्थः नचारूढाधिकारात्पितृपदेनारूढोग्राह्यइतिवाच्यं जन्मेतिसूत्रात्सूत्रकारेणक्वचित्कारकात्क्व चिज्जन्मलग्नादुक्तत्वात पितृशब्देनास्मिन्ग्रंथेप्रायोलग्नस्यैवग्रहणाच्चेतियदितत्रपापः शुभस्थानेशुभःपापस्थानेतत्रफ लमाह ३२ योगद्वयेशुभपापमिश्रणेसातिसमाःराजसमाइत्यर्थः ३३ शुभस्थानेपापाएवपापस्थानेशुभाएवतर्हि

For Private and Personal Use Only

दरिद्राभवंति ३४ लग्नाधिपात्सप्तमाधिपाच्चपंचमेगुर्वाग्न्यतमेसतिराजकीयाराजाधिकारवंतोभवंति ३५ लग्नसप्तमाधिपाभ्यांतृतीयेषष्ठेवापापेसतिसेनाधिपतयोभवंति अथबुद्धियोगमाह ३६ आत्मकारकाल्लग्नाच्चतृतीयषष्ठगतग्रहदृष्ट्याकारकेलग्नेचेत्यर्थः तथातृतीयषष्ठेशदृष्ट्यातथापंचमेशदृष्ट्यालग्नकारकयोर्धीमंतोभवंति ३७ कारकाल्लग्नाद्वाचतुर्थेशदृष्ट्यालग्नकारकयोःसुखिनोभवंति ३८ कारकलग्नाभ्यामष्टमेशस्यकारकलग्नयोर्दृष्ट्यादरिद्राभवंति

**मातरिगुरौशुक्रेचंद्रेवाराजकीयाः ३५ कर्मणिदासेवापापेसेनान्यः ३६ स्वपितृभ्यांकमंदासस्थदृष्ट्यातदीशदृष्ट्यामातृनाथदृष्ट्याचधीमंतः ३७ दारेशदृष्ट्यासुखिनः ३८ रोगेशदृष्ट्यादरिद्राः ३९ रिपुनाथदृष्ट्याव्ययशीलाः ४० स्वामिदृष्ट्याप्रबलाः ४१ पश्चाद्रिपुभाग्ययोर्ग्रहसाम्येबंधः कोणयोरिपुजाययोःकीटयुग्मयोर्दाररिष्फयोश्च ४२**

३९ कारकलग्नाभ्यांद्वादशेशस्यलग्नकारकयोर्दृष्ट्याव्ययस्वभावाभवंति ४० लग्नेलग्नेशदृष्ट्याकारकेकारकाश्रयराशिदृष्ट्याबलवंतोभवंति ४१ अथापयोगानाह पश्चाल्लग्नात्द्विद्वादशयोः पंचमनवमयोः द्वादशषष्ठयोरेकादशतृतीययोश्चतुर्थदशमयोर्वाग्रहसाम्येएकश्चेदेकः द्वौचेत्द्वौत्रयश्चेत्त्रयइतिरीत्याखेटसाम्येसतिबंधःकारापतनंभवति अत्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पठितेषुबुद्धिकेषुनसमुच्चयनियमइतिवाच्यम् एवमृक्षाणांतदीशानांचशुभसंबंधेनिरोधमात्रंपापसंबंधाच्छृंखलाप्रहारादयः ऋक्षाणांद्विद्वादशादिद्विकानांपूर्वोक्तरीत्याशुभसंबंधेसतिद्वितीयद्वादशयोरित्यादिद्विकयोरन्यतरयोगघटकतयाशुभसंबंधश्चेन्निरोधमात्रम् नतुपीडापापसंबंधात्केवलपापसंबंधाच्छृंखलादयोभवंति द्विद्वादशादिषुशुभसंबंधाभावेपिद्वादशेशादिषुशुभसंबंधेसतिनिरोधमात्रंपापसंबंधेतुशृंखलादयोभवंतीत्यर्थः ४२ अथनेत्रभंगयोगमाह शुक्राल्लग्नाद्रौणपदस्थः पंचमराश्यारूढस्थोराहुः सूर्यदृष्टश्चेन्नेत्रनाशकरःस्यात् ४३ स्वादात्मकारकाच्चतुर्थगयोः शुक्रचंद्रयोः

**शुक्राद्रौणपदस्थोराहुःसूर्यदृष्टोनेत्रहा ४३ स्वदारगयोःशुक्रचंद्रयोरातोद्यंराजचिन्हानिच ४४ उपपदंपदंपित्रनुचरात् १**

सतोःआतोद्यंवाद्यविशेषोराजचिन्हानिपताकादीनिचस्युः ४४ इतिजैमिनिसूत्रव्याख्यायांसुबोधिन्यांप्रथमाध्यायस्यतृतीयपादः ॥ ३ ॥ अथोपपदादिकमवलंब्यफलमादिशति तत्रादावुपपदंलक्षयति लग्नानुचरात्पदंलग्नात्द्वादशस्यराशेर्यत्पदंतदुपपदमित्यर्थः ननुपित्रनुचरपदेनद्वादशस्यबोधः कथमितिचेत् उच्यते पितृलग्नमनुचरंद्वितीयंयस्येतिव्युत्पत्त्याग्रहाणयत्तुपित्रनुचरादितिपाठंस्वीकृत्याखंडात्सप्तसंख्यालाभात्सप्तमात्पदमुपपदमितिपंथैरुक्तम् तदयुक्तम् एवंचेल्लाघवात् उपपदंपदंलाभादितिसूत्रंप्रणीतंस्यादित्यलम्

For Private and Personal Use Only

तत्रफलमाह १ पापस्यतत्रपापस्वामिकेतस्मिन्नुपपदद्वितीयेपापयोगेसतिप्रव्रज्यासंन्यासः स्त्रीनाशोवास्यात् यथा कारकाधिकारपदाधिकारयोस्तत्रेतिपदेनकारकेपदेइत्यर्थोभवति तथात्रोपपदेइतिकुतोनोक्तमितिचेत्सत्यंतत्रोभय त्राधिकारःस्थितः अत्रनास्तीतितत्रपदेनद्विसंख्यालाभादुपपदद्वितीयेइत्युक्तम् अनुभवसिद्धत्वाच्चेति तदुक्तंवृद्धैः आ रूढात्षष्ठमेपापेचोरःस्याच्छुभवर्जिते आरूढाद्वापिसौम्येतुसर्वदिश्यधिपोभवेत् सर्वज्ञस्तत्रजीवेस्यात्कविर्वादेचभा र्गवेइति आरूढादुपपदात् आरूढपदेनचेदारूढंगृह्यतेतर्हिपदाधिकारएवोक्तंस्यान्नत्वत्रेतिनचोपपदादितिवक्तव्ये

**तत्रपापस्यपापयोगेप्रव्रज्यादारनाशोवा २ उपपदस्याप्यारूढत्वादेवनात्ररवि पापः ३ शुभदृग्योगान्न ४ नीचेदारनाशः ५ उच्चेबहुदाराः ६ युग्मेच ७**

आरूढादितिकथमुक्तमितिवाच्यम् २ अत्रविषयेरविः पापत्वेननग्राह्यः तेनसिंहेउपपदद्वितीयेमेषादिपापराशौरवौवा सतिनेदंफलमित्यर्थः ३ उपपदद्वितीयेशुभदृष्टियोगाभ्यामुक्तयोगेसत्यपिनेदंफलंभवति ४ उपपदद्वितीयेनीचग्रहां शकेनीचग्रहाधिष्ठितेवासतिदारनाशोभवति ५ उपपदद्वितीयेउच्चेशउच्चग्रहाधिष्ठितेवासतिबहुदारःस्यात् ६ उप पदद्वितीयेमिथुनेसातिबहुदारःस्यात् ७ दारनाशयोगेविलंबकरयोगमाह तत्रोपपदद्वितीयेस्वामिनायुकेउत्तरायुष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्दारःस्यात् तच्छब्देनपूर्वपरामर्शः तद्वेतौतस्योपपदद्दितीयस्यहेतुः स्वामीतस्मिन्स्वर्क्षेस्वराशौसतिचोत्तरायुषिनि
र्दारःस्यात् राशेकारणीभूतोग्रहएवतस्मात्स्वामिनः स्वगृहयोगोऽपेक्षितः ननुस्वाम्यादिभिस्तच्छब्देनदारकारकग्रह
णात्त्वयेदंकथमुक्तमितिचेच्छृणु आदौदारकारकग्रहणाभावातच्छब्देनदारकारकग्रहणानौचित्यात् पूर्वंदारनाशपदेन
दारकारकबोधाभावाच्चननुरविचंद्रयोरेकगृहत्वात्स्वर्क्षेतद्वेत्तावित्यंशस्यसंभवोनेतिचेन्मास्त्वस्माकंकाक्षतिरिति ८ त

**तत्रस्वामियुक्तेस्वर्क्षेवातद्वेतावुत्तरायुषिनिर्दारः ८ उच्चेतस्मिन्नुत्तमकुलाद्दारलाभः ९ नी
चेविपर्ययः १० शुभसंबंधात्सुंदरी ११ राहुशनिभ्यामपवादात्त्यागोनाशोवा १२ शुक्र
केतुभ्यांरक्तप्रदरः १३ अस्थिस्त्रावोबुधकेतुभ्यां १४ शनिरविराहुभिरस्थिज्वरः १५**

स्मिन्नुपपदद्दितीयस्वामिनिउच्चराशौस्थितेसत्युत्तमकुलाद्दारलाभःस्यात् ९ तस्मिन्नुपपदद्दितीयस्वामिनिनीचराशि
स्थितेसतिअनुत्तमकलाद्दारलाभःस्यात् १० उपपदद्दितीयशुभवर्गदृष्टियोगेसतिस्त्रीसुंदरीभवति ११ उपपदद्दितीये
राहुशनिभ्यांयोगेसतिलोकापवादात्स्त्रियस्त्यागोनाशोवास्यात् १२ उपपदद्दितीयेशुक्रकेतुयोगेसतिरक्तप्रदररोगवती
स्त्रीस्यात् १३ उपपदद्दितीयेबुधकेतुभ्यांयोगेअस्थिस्रावरोगवतीस्त्रीस्यात् १४ उपपदद्दितीयेशन्यादित्रिकयोगेऽस्थि

For Private and Personal Use Only

ज्वरवतीस्यात् १५ उपपदद्वितीयेबुधकेतुभ्यांयोगेस्थूलास्त्रीस्यात् १६ बुधगृहेभौमगृहेवोपपदद्वितीयगतेसतिशनि भौमाभ्यांयोगेनासिकारोगवतीस्यात् १७ बुधकुजान्यतरक्षेत्रेउपपदाद्द्वितीयगेसतितत्रगुरुशनियोगेकर्णरोगवतीनरह कानाडिकानिःसरणरोगवतीचस्यात् १८ १९ बुधकुजान्यतरक्षेत्रगेउपपदद्वितीयेगुरुराहुभ्यांयोगेदंतरोगवती स्यात् २० कन्यातुलान्यतरगेउपपदद्वितीयेशनिराहुभ्यांयोगेपंग्वीवातरोगवतीवास्यात् २१ यद्युपपदद्वितीयेशुभ

**बुधकेतुभ्यांस्थौल्यं १६ बुधक्षेत्रेमंदाराभ्यांनासिकारोगः १७ कुजक्षेत्रेच १८ गुरुशनिभ्यांकर्णरोगःनरहकाच १९ गुरुराहुभ्यांदंतरोगः २० शनिराहुभ्यां कन्यातुलयोःपंगुर्वातरोगोवा २१ शुभदृग्योगान्न २२ सप्तमांशग्रहेभ्यश्चैवं २३ बुधशनीशुक्रेचानपत्यः २४ पुत्रेषुरविराहुगुरुभिर्बहुपुत्रः २५**

योगोदृष्टिर्वास्यात्तर्हिनिरुक्तादोषानस्युः २२ उपपदाद्यःसप्तमोभावस्तद्भावस्थनवांशश्चताभ्यांतयोःस्वामिनौग्रहौ ताभ्यांचद्वितीये एवंपूर्वोक्तानिफलानिसमुन्नेयानि तदुक्तंवृद्धैः सप्तमेशात्द्वितीयस्थेप्येवंफलमुदाहृतमिति २३ उप पदात्सप्तमांशग्रहेषुबुधशनिशुक्रयोगेसत्यपत्यहीनोभवति २४ उपपदात्सप्तमांशग्रहेभ्यः पंचमस्थानेषुरव्यादिषुस



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्सुबहुपुत्रःस्यात् २५ सप्तमांशग्रहेभ्यःपंचमस्थानेषुचंद्रेसतिएकपुत्रःस्यात् २६ उपपदात्सप्तमांशग्रहेभ्यः पंचमस्था नेषुअनपत्यत्वबहुपुत्रत्वादिग्रहमिश्रणेसतिविलंबात्पुत्रलाभःस्यात् २७ उपपदात्सप्तमांशग्रहेभ्यः पंचमेषुकुजशनि भ्यांस्थिताभ्यांदत्तपुत्रवान्स्यात् २८ उपपदात्सप्तमांशग्रहेभ्यः पंचमेषुओजराशौसतिबहुपुत्रःस्यात् २९ उक्तस्था नेयुग्मराशौसत्यल्पापत्योभवति ३० गृहक्रमाज्जन्मलग्नक्रमात् यथाभावानांविचारःक्रियते तथाकुक्षितदीशादि

**चंद्रेणैकपुत्रः २६ मित्रेविलंबात्पुत्रः २७ कुजशनिभ्यांदत्तपुत्रः २८**
**ओजेबहुपुत्रः २९ युग्मेल्पप्रजः ३० गृहक्रमात्कुक्षितदीशपंचमांश**
**ग्रहेभ्यश्चैवं ३१ भ्रातृभ्यांशनिराहुभ्यांभ्रातृनाशः ३२**

भ्योपिकुर्यात् कुक्षितदीशावुपपदोपपदेशौताभ्यांपंचमांशग्रहाः पंचमभावस्तद्भावस्थनवांशश्चताभ्यांतयोःस्वामि ग्रहाभ्यांचैवपूर्वोक्तफलविचारः कार्यइत्यर्थः तस्माद्यत्रयस्यसंभवस्तस्याग्रिमसूत्रेनुवृत्तिः कार्याभ्रातृस्थाभ्यमित्या दिसूत्रेषूपपदोपपदेशाभ्यांविचारःकार्यइति कुक्षिपदेनप्रकरणपठितोपपदस्यग्रहणंननुस्वाम्यादिभिः कुक्षितदीशा वितिसिंहरवीत्युक्तंतत्सर्वसाधारण्यादनुपयुक्तंविशेषतोऽस्मिन्शास्त्रेऽक्षरगम्यांकानामेवग्रहणादिति ३१ उपपदोप

For Private and Personal Use Only

देशाभ्यांभ्रातृस्थाभ्यामेकादशतृतीयस्थाभ्यांशनिराहुभ्यांभ्रातृनाशः एकादशेज्येष्ठस्यतृतीयेकनिष्ठस्यनाशः कर्मादि भिर्भ्रातुर्व्ययादिर्ज्येष्ठस्येतिसूत्रदर्शनात् ननुउपपदोपपदेशाभ्यामितिकुतःसमागतमितिचेच्छृणुगृहक्रमादितिसूत्रा त्कुक्षितदीशपदात् नचसमासपतितपदानामेकांशानुवृत्तेरसंभवादितिवाच्यम् अन्यपदेभ्योभ्रातृविचारायोग्यत्वादे कांशानुवृत्तेरितिभावः ३२ एकादशतृतीयान्यतरस्थेनशुक्रेणयथाक्रमंव्यवहितपूर्वापरमातृगर्भनाशःस्यात् ३३ लग्ने

**शुक्रेणव्यवहितगर्भनाशः ३३ पितृभावेशुक्रदृष्टेपि ३४ कुजगुरु चंद्रबुधैर्बहुभ्रातरः ३५ शन्याराभ्यांदृष्टेयथास्वंभ्रातृनाशः ३६ शनिनास्वमात्रशेषश्च ३७ केतौभगिनीबाहुल्यं ३८**

लग्नादष्टमेवाशुक्रदृष्टेसत्यपिव्यवहितगर्भनाशइत्यर्थः ३४ उपपदोपपदेशाभ्यांतृतीयैकादशस्थैःकुजादिभिर्भ्रातृ बाहुल्यंस्यात् ३५ उपपदोपपदेशाभ्यांतृतीयैकादशयोःशन्यारदृष्टौसत्यांयथास्वंभ्रातृस्थानमनतिक्रम्यतृतीयेदृष्टौ कनिष्ठस्यैकादशेदृष्टौज्येष्ठस्योभयत्रदृष्टावुभयोश्चनाशःस्यात् ३६ उपपदोपपदेशाभ्यांतृतीयैकादशयोः शनिदृष्टौ सत्यांकेवलंस्वमात्रशेषःस्यादन्येनश्यंतीत्यर्थः ३७ उपपदोपपदेशाभ्यांतृतीयैकादशयोः केतौसतिभगिन्योयथास्वं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूयस्योभवंति ३८ उपपदसप्तमेशात्द्वितीयपराशौराहौसतिस्थूलदंष्ट्रावान्स्यात् तदुक्तंप्राच्यैः सप्तमेशात्द्वितीयस्थेरा हौमूकःखलेस्थिते अदंतोधिकदंतोवादंष्ट्रायुक्तोथवाभवेत् पवनव्याधिमान्केतौयद्वास्यादस्फुटोक्तिमान् तत्रनानाग्रहै र्योगेमिश्रंफलमुदाहृतमिति ३९ उपपदसप्तमेशात्द्वितीयेकेतौसतिस्तब्धवागस्फुटोक्तिमान्स्यात् ४० उपपदसप्त मेशात्द्वितीयेशनौसतिकुरूपोभवति ४१ आत्मकारकाश्रितनवांशस्वभावाज्जातकांतरप्रसिद्धाज्जातकवतोवर्णाग्रा

लाभेशाद्भाग्यभेराहौदंष्ट्रावान् ३९ केतौस्तब्धवाक् ४० मंदेकुरूपः
४१ स्वांशवशाद्ग्रहैर्नीलपीतादिवर्णाः ४२ अमात्यानुचराद्देवताभ
क्तिः ४३ स्वांशेकेवलपापसंबंधेपरजातः ४४ नात्रपापात् ४५

ह्याः एवंचतत्तत्कारकांशतस्तेषांतेषांवर्णाज्ञेयाइत्यपिबोध्यम् ४२ अमात्यग्रहान्न्यूनोयोग्रहस्तस्माद्देवताभक्तिर्विचा रणीया अत्मात्यानुचरोदेवताकारकस्तस्यपापत्वेक्रूरदेवतायां शुभत्वेसौम्यदेवतायां उच्चगत्वेस्वर्क्षगतत्वेचभक्तिदृढ तानीचगत्वेभक्त्यस्थैर्यमित्यादिकंज्ञेयम् ४३ कारकांशेशुभग्रहरहितंकेवलपापसंबंधेजारजातोभवतिसंबंधस्तुदृष्टियो गषड्वर्गैःज्ञेयः ४४ अत्रकारकश्चेत्पापोभवतितदात्विदंफलंनस्यात् कारकातिरिक्तादेवपापसंबंधादिफलंवाच्यं नका

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रकात्पापादित्यर्थः अथवाऽत्राष्टमेपापग्रहेसतिनायंयोगः ४५ शनिराहूयदियोगबटकौशनिराहुदृष्टियोगषड्वर्गैः परजा
तत्वप्रसिद्धिर्भवति ४६ अन्येभ्यःपापग्रहेभ्योयोगेसतिपरजातत्वगोपनंभवति ४७ पापग्रहेषुयोगघटकेषुसत्सुकारकां
शेशुभषड्वर्गसंबंधेसतितुपरजातत्वापवादएवभवेन्नतुपरजातत्वमित्यर्थः ४८ कारकांशोद्विग्रहयोगेसतिकुलमुख्योभवति
४९ इतिश्रीनीलकंठज्योतिर्विद्विरचितायांजैमिनिसूत्रव्याख्यायांसुबोधिन्यांप्रथमाध्यायस्यचतुर्थःपादःसमाप्तः ॥४॥
अथायुर्दायोपायंदर्शयति लग्नेशाष्टमेशाभ्यामायुर्विचार्यमित्यर्थः लग्नेशाष्टमेशस्थितिवशतोदीर्घायुर्योगमाह १

**शनिराहुभ्यांप्रसिद्धिः ४६ गोपनमन्येभ्यः ४७ शुभवर्गेपवादमात्रं ४८ द्विग्रहे**
**कुलमुख्यः ४९ ॥ ६९ ॥ आयुःपितृदिनेशाभ्यां १ प्रथमयोरुत्तरयोर्वादीर्घं २**

प्रथमयोश्चरयोरुत्तरयोः स्थिरद्विस्वभावयोर्वायदिलग्नेशाष्टमेशौभवतस्तर्हिदीर्घमायुर्भवति अयमर्थः यत्रक्वापिचर
राश्योर्लग्नेशाष्टमेशयोः स्थित्यादीर्घायुर्योगः स्थिरद्विस्वभावयोः लग्नेशाष्टमेशयोः स्थित्यावास्थिरेलग्नेशेसतिद्वंद्वे
ऽष्टमेशः द्वंद्वेलग्नेशेसतिस्थिरेष्टमेशइति पर्यायेणभवतस्तदापिदीर्घायुर्योगस्यादिति अत्रैकस्मिन्नेवचरादौतदुभयस
त्वेएकस्यैवतदुभयस्वामित्वेवानयोगहानिः २ अथमध्यायुर्योगंदर्शयति प्रथमद्वितीययोश्चरस्थिरयोश्चरेलग्नेशः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थिरेऽष्टमेशश्चरेऽष्टमेशोस्थिरेलग्नेशइतिरीत्यायदिभवतः यदिवाद्विस्वभावयोर्द्वावपिलग्नेशाष्टमेशौयत्रक्वापिभवतार्हि मध्यायुर्भवतीत्यर्थः ३ अथाल्पायुर्योगमाह यदिमध्ययोःस्थिरयोर्यत्रक्वापिलग्नेशाष्टमेशौस्तः यदिवाआद्यंतयोश्चर द्विस्वभावयोर्लग्नेशाष्टमेशौस्तस्तर्हिहीनमल्पायुर्भवतीत्यर्थः अथयथालग्नेशाष्टमेशयोराशिस्थितिभेदेनदीर्घमध्या ल्पायूंषिप्रोक्तानितथैवलग्नचंद्राभ्यामप्युच्यंते ४ मंदचंद्राभ्यांलग्नेंदुभ्यामेवंपूर्वोक्तप्रकारेणदीर्घमध्याल्पायूंषिविचा र्याणीत्यर्थः५ जन्मलग्नहोरालग्नाभ्यांचपूर्वोक्तप्रकारेणदीर्घमध्याल्पायूंषिसमानेयानि तथाच त्रिविधद्वंद्वेनदीर्घमध्या

| | | |
|---|---|---|
| १ दीर्घ १ | १ मध्य २ | १ अल्प ३ |
| २ दीर्घ ३ | २ मध्य १ | २ अल्प २ |
| ३ दीर्घ २ | ३ मध्य ३ | ३ अल्प १ |

**प्रथमंद्वितीययोरंत्ययोर्वामध्यं ३ मध्ययोराद्यंतयोर्वाहीनं ४**
**एवंमंदचंद्राभ्यां ५ पितृकालतश्च ६ संवादात्प्रामाण्यं ७**

ल्पायूंषित्रेधासमानेयानीतिपर्यवसितोर्थः होरालग्नानयनंतुपूर्वमेवोक्तम् एतदुक्तंवृद्धैःलग्नेशरंध्र पत्योश्चलग्नेंद्वोर्लग्नहोरयोः सूत्राण्येवंप्रयुंजीयात्संवादादायुषांत्रये चरेचरास्थिरद्वंद्वाःस्थिरेद्वंद्वचर स्थिराः द्वंद्वस्थिरोभयचरादीर्घमध्याल्पकायुषः प्रथमयोरित्यादिसूत्रत्रयसंग्राहकश्चरइति प्रस्तार श्लोकः प्रस्तारश्चक्रेद्रष्टव्यः ६ अथत्रिविधेष्वायुर्दायनिर्णयोपापेषुत्रयाणामेकाकारायुःप्रदत्वेनिर्विवादमेवद्वयोरेकका

For Private and Personal Use Only

रायुःप्रदत्वेऽपरस्यभिन्नायुःप्रदत्वेनिर्णयमाह प्रकारद्वयेनयादृशमायुरायाति तदेव ग्राह्यंनत्वेकेनागतमिति अथत्रयाणां पक्षाणांवैरूप्येग्राह्यपक्षमाह ७ त्रयाणामपिपक्षाणांविसंवादेवैरूप्येसतिजन्मलग्नहोरालग्नाभ्यामागतमायुर्ग्राह्यमित्यर्थः सर्वत्रैव विसंवादेलग्नहोराभ्यामेवायुःप्राप्तावपवादमाह ८ लग्नेसप्तमेवाचंद्रेस्थितेसतिचंद्रलग्नाभ्यामागतमायुर्ग्राह्यमित्यर्थः अल्पायुष्यादिकंवृद्धैरुक्तम् द्वात्रिंशात्पूर्वमल्पायुर्मध्यमायुस्ततोभवेत् चतुःषष्ट्याःपुरस्तात्तुततोदीर्घमुदाहृतमिति दात्रिंशच्चतुष्षष्ठिषण्णवतिरूपेष्वागतेष्वायुर्दायेषुस्पष्टीकरणंवृद्धैरुक्तम् पूर्णमादौहानिरंतेऽनुयातोमध्यतो

## विसंवादेपितृकालतः ८ पितृलाभगेचंद्रेचंद्रमंदाभ्यां ९

भवेत् राशिद्वयस्ययोगार्द्धंवर्षाणांस्पष्टमुच्यते एवंद्विकानांसंचिंत्यत्रयाणांसूत्रवर्त्मनेति अयमर्थः प्रथमयोरित्यादिसूत्रजालेनायुर्यन्निर्णीतं तत्रदीर्घायुषिसमागतेमध्यमायुरवधिपर्यंतंनिर्विशंकंसिद्धमेव तदुपरितनेदीर्घायुः खंडेद्वात्रिंशदब्दरूपेकियद्ग्राह्यमितिसंशयनिराकरणायायंश्लोकःपितृदिनेशौद्वावपियद्राशौभवतस्तद्राशेरारंभेतौचेत्तर्हितत्रोचितः खंडःपूर्णएवतद्राश्यंतेयदितौभवतस्तर्हितत्खंडस्यविनाशएव मध्येत्वनुपातेनखंडैकदेशोग्राह्यः अनुपातस्त्वित्थंत्रिंशदंशैश्चेत्द्वात्रिंशद्वर्षाणितर्ह्येकेनांशेनकिमिति ३२ प्राप्तं १ तत्रलग्नेशाष्टमेशयोःपृथक्स्पष्टंविधायराशीन्दूरीकृत्यांशादेरेक

खंडस्यत्रैराशिकेनयदायातिलग्नेशस्याष्टमेश ३०० स्यच २४ तयोरागतयोर्वर्षादिपिंडयोर्योगंविधायतद्योगार्द्धंस्प ष्टंभवति तच्चयदिदीर्घायुः संबंधितर्हिचतुःषष्ठिमध्येयोज्यम् यदिमध्यायुःसंबंधितदाद्वात्रिंशन्मध्येयोज्यम् यद्यल्पायुः संबंधितदाप्रथमखंडाभावात्स्वयमेवजन्मप्रभृतिवर्तमानमायुर्भवति एवंमंदचंद्रयोःपितृकालयोरपिसमागतायुष्यंतिम खंडस्पष्टीकरणंविज्ञेयम् अन्येतु होरालग्नादिमांशेतुपूर्णमंतेनकिंचन स्पष्टीकरणमेतत्स्याद्दीर्घमध्याल्पकायुषि अनु पातस्तुपूर्ववत् अनेनहोरालग्नस्यापिसावयवत्वंप्रदर्शितं अथदीर्घमध्याल्पायुर्योगेषुकंचनविशेषंदर्शयति ९ यद्यत्रश

**शनौयोगहेतौकक्ष्याह्रासः १० विपरीतमित्यन्ये ११**

**सूत्राभ्यांनस्वर्क्षतुंगगेसौरे १२ केवलपापदृग्योगिनिच १३**

निर्योगकर्तास्यात्तदाकक्ष्याह्रासोभवति दीर्घंचेन्मध्यंमध्यंचेदल्पंअल्पंचेन्नकिंचनेति मतांतरमाह १० शनौयोगक र्तरिविपरीतंह्रासोनभवति किंतु यथास्थितएवेत्यन्येआचार्यावदंति ११ परपक्षंनिर्दिश्यस्वपक्षमाह स्वराशिस्वो च्चगेशनौतथाशुभदृग्योगरहितकेवलपापदृष्टियोगविशिष्टेशनौचनकक्ष्याह्रासः अन्यथातुह्रासोभवत्येव १२ अत्रान्याचार्यमतमेवानुभवसिद्धमिति सर्वमतसिद्धांतकक्ष्यावृद्धिंयोगांतरेणोपदिशति १३ लग्नसप्तमयोर्गुरौसति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापापंदृष्टिपापयोगरहितशुभदृष्टिशुभयोगसहितेगुरौचकक्ष्यावृद्धिरित्यर्थः तथाचानायुषोल्पायुर्वृद्धिः अल्पायुषो
मध्यायुर्वृद्धिः मध्यायुषोदीर्घायुर्वृद्धिः दीर्घायुषःषण्णवत्यूर्द्धमायुर्भवतीत्यर्थः आयुषिप्रमाणसिद्धेपूर्णेमरणमतांतरापि
मरणंभवतीत्याकांक्षायामाह १४ द्वारंबाह्यंचेति समाहारद्वंद्वः दशाश्रयोद्वारंततस्तावतिथंबाह्यमित्यग्रेवक्ष्यति त
स्मिन्पाकभोगापरपर्यायेद्वारबाह्येमलिने स्वयंपापेपापयुक्तेपापदृष्टेचसतिद्वारबाह्ययोर्नवांशेनवांशदशायांनिधनंभव
ति अत्रनवांशपदेनप्रतिराशिनवांशमितानवाब्दाग्राह्याः विषमेतदादिर्नवांशइत्यादिनावक्ष्यमाणानवांशदशेति

**पितृलाभगेगुरौकेवलशुभदृग्योगिनिचकक्ष्यावृद्धिः १४ मलिनेद्वारबाह्येनवांशेनिधनं**
**द्वारद्वारेशयोश्चमालिन्ये १५ शुभदृग्योगान्न १६ रोगेशेतुंगेनवांशवृद्धिः १७**

जन्मकालेआद्यदशाश्रयराशेर्यावत्संख्याकोद्धरराशिस्तस्मात्तावत्संख्याकोराशिर्बाह्यमुच्यते द्वारबाह्ययोर्द्वयोरपिम
लिनत्वएवनिधनंनत्वन्यतरस्य एवंद्वारराशेर्द्वारेशस्यचमालिन्येसतिद्वारतदीशाश्रयराशिनवांशदशायांनिधनंभवती
त्यर्थः १५ निधनयोगापवादमाह द्वारबाह्यद्वारेशानांशुभदृष्टिशुभयोगसत्वेद्वारबाह्यद्वारेशाश्रयनवांशदशायांनि
धनंनेत्यर्थः १६ अथशुभदृग्योगाभावेपिनवांशकालनिधनापवादमाह जन्मलग्नादष्टमेशेउच्चंगतेसत्युक्तनिधनयोगे

For Private and Personal Use Only

सत्यपिदशायांमरणमुक्तम् तदुत्तरंनवांशवृद्धिः नवाब्दवृद्धिरित्यर्थः ननुराशिवृद्धौसत्यांकुत्रराशौनिधनमितिशंकायामा
ह १७ तत्रापिवृद्धिपक्षेपिपदस्यलग्नारूढस्येशःस्वामी तदाश्रयीभूतराशेर्दशायांअंतेनिधनंस्यात् अथवा जन्मलग्ना
रूढनवांशदशायांनिधनंस्यात् किंवालग्नेशाष्टमेशाभ्यांत्रिकोणेलग्नपंचमनवमान्यतरराशिदशायामंतर्दशायांवानिधनं
भवतीत्यर्थः १८ अथप्रकारांतरेणदीर्घादियोगत्रयमाह लग्नात्सप्तमाच्चयावष्टमेशौतयोर्यः प्राणीबलीतस्मिन्कंटका
दिस्थेलग्नादिकेन्द्रपणफरापोक्लिमस्थेत्रिधायोगोभवति लग्नादिकेन्द्रगेतस्मिन्दीर्घायुर्योगः पणफरस्थेमध्यायुः आपो

**तत्रापिपदेशदशांतेपदनवांशदशायांपितृदिनेशत्रिकोणेवा १८ पितृलाभरोगे**
**शेप्राणिनिकंटकादिस्थेस्वतश्चैवंत्रिधा १९ योगात्समेस्वस्मिन्विपरीतं २०**

क्लिमस्थेत्वल्पायुरित्यर्थः एवंस्वतश्चकारकादपियोगत्रयमिदंबोध्यम् तथाचकारकात्तत्सप्तमाच्चयावष्टमेशौतयोर्यो ब
लीतस्मिन्कारककेंद्रादिस्थेदीर्घमध्याल्पायुर्योगाभवंतीत्यर्थः अथैतद्योगानामपवादमाह १९ योगाज्जन्मलग्नसप्त
मात्सप्तमेनवमेस्वस्मिन्कारकेसतिविपरीतंपितृलाभेत्यादिसूत्रोपदिष्टयोगानस्युः किंतु दीर्घंचेन्मध्यं मध्यंचेदल्पंअल्पं
चेन्नकिंचिदित्यर्थः वैपरीत्यंतुदीर्घंचेदल्पंअल्पंचेद्दीर्घंमध्यंचेन्मध्यमेवेतितुसंप्रदायविदः आयुर्दायविषयेविशेषमाहु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृद्धाः एकोष्टमेशःस्वोच्चस्थःपर्यायार्द्धंप्रयच्छति नीचस्थोनाशश्चेत्पर्यायार्द्धमायुषिनिश्चिते नीचरंध्रेशसंयुक्ताःपर्यायार्द्धं
पृथक्पृथक् ग्रहाविनाशयंत्येवंनिर्णीतेपरमायुषि उच्चरंध्रेशसंयुक्तग्रहैःप्रत्येकमुन्नयेत् एकैकमर्द्धपर्यायंपरमायुषिनिश्चि
ते अयमर्थः आयुःपितृदिनेशाभ्यामित्यनेनाष्टमेशउच्चस्थश्चेत्स्वपर्यायार्द्धंस्वदशार्द्धमधिकंददाति नाथांताइतिरीत्या
यावदायुरायाति तस्मिन्पुनरपितदर्धमधिकंयोजनीयमितियावत् अष्टमेशोनीचराशिगश्चेदायुष्यर्द्धंनाशयेत् एवमेव
नीचाष्टमेशयुक्ताग्रहाअपिस्वदीयमानायुष्यर्द्धमर्द्धंनाशयेयुः एवमुच्चाष्टमेशसंयुक्ताग्रहाः स्वदीयमानायुषिस्वदशा

## राशितःप्राणः २१ रोगेशयोःस्वतऐक्येयोगेवामध्यं २२

र्द्धमधिकंदद्युः एवमेवलग्नेशादयोपिग्रहाः उच्चनीचगुणतोवृद्धिऱ्हासौकुर्युरितिसंप्रदायः अस्मिन्प्रकरणेकिंबलंग्राह्यं
मित्याशंकायामाह २० अत्रराशितोबलंग्राह्यंकारकयोगः प्रथमोभानामित्यादिकंवक्ष्यमाणबलंग्राह्यम् अत्रांशाधिक्य
बलंनग्राह्यमित्यर्थः अथप्रकारांतरेणमध्यायुर्योगमाह २१ लग्नात्सप्तमाच्चरोगेशयोरष्टमेशयोःस्वतःकारकेणैक्ये
सतियोगेवासतिपितृलाभेत्यादिसूत्रेणप्राप्तदीर्घायुषामपिमध्यायुरेवभवतीत्यर्थः जातकशास्त्रांतरे लग्नस्यास्मिन्ग्रंथे
कारकस्यप्राधान्यादष्टमेशयोगेनायुषोऱ्हासएवेतिविभावनीयम् २२ अथदीर्घादियोगेषुकक्ष्याऱ्हासमाह पितृलाभ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योर्लग्नसप्तमयोर्द्वयोरपिपापग्रहस्यमध्यवर्तित्वेकक्ष्याऱ्हासोभवति लग्नकुंडल्यांद्विद्वादशयोः षष्ठाष्टमयोश्चपापयोगे सतिपापमध्यवर्तित्वंभवति एवंलग्नसप्तयोकोणपापयोगेवाकोणेषुत्रिकोणेषु लग्नपंचमनवमेषुसर्वत्रपापयोगेवाकक्ष्याऱ्हासोभवति २३ स्वस्मिन्कारकेप्प्येवंलग्नकुंडलीवद्भवति अयमर्थः कारकराशेस्तत्सप्तमराशेश्चपापमध्यत्वे एकयोगः कारकतत्सप्तमयोस्त्रिकोणेसर्वत्रपापयोगेसतिद्वितीयोयोगः २४ कक्ष्याऱ्हासायतस्मिन्कारकेपापेनीचे सतिकक्ष्याऱ्हासः कारकेपापेऽतुंगेनुच्चराशौअशुभसंयुक्तेचसतिकक्ष्याऱ्हासोभवतीतितृतीयोयोगः अथकक्ष्याऱ्हास

**पितृलाभयोःपापमध्यत्वेकोणपापयोगेवाकक्ष्याऱ्हासः २३ स्वस्मिन्नप्येवं २४**
**तस्मिन्पापेनीचेऽतुंगेऽशुभसंयुक्तेच २५ अन्यदन्यथा २६ गुरौच २७**

योगेअपवादमाह २५ अन्यथालग्नसप्तमयोःकारकसप्तमयोर्वाशुभग्रहमध्यगतत्वेलग्नकारकाभ्यांकोणेषुशुभयोगे वाकारके शुभेऽनीचेवाकारकेशुभेतुंगेशुभसंयुक्तेचवा अन्यत्कक्ष्यावृद्धिरित्यर्थः तथाचसर्वत्रयोगेपापात्मकेकक्ष्याऱ्हासः शुभात्मकेकक्ष्यावृद्धिः शुभपापरहितेनवृद्धिर्नऱ्हासइतिबोध्यम् अथऱ्हासवृद्धिप्रकारान्गुरावपिदर्शयति २६ एवमित्यर्थः गुरोर्द्विद्वादशषष्ठाष्टमत्रिकोणेषुपापयोगेसतिकक्ष्याऱ्हासः गुरौनीचेअतुंगेऽशुभसंयुक्तेचकक्ष्याऱ्हासः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यथाचेदन्यथेति प्राग्वद्योजनांतत्रापवादंदर्शयति २७ उक्तस्थानेषुशुभग्रहयोगप्रकरणेपूर्णेंदुशुक्रयोर्योगेसतिनक
क्ष्यावृद्धिः किंत्वेकराशिवृद्धिरेवेत्यर्थः पापयोगेनयःकक्ष्याऱ्हासउक्तस्तत्रापवादंदर्शयति २८ शनावुक्तस्थानगेस
तिनकक्ष्याऱ्हासः किंत्वेकराशिऱ्हासएवेत्यर्थः अत्रचंद्रशुक्रशनीनांप्राधान्येनयोगकर्तृत्वेनग्रहांतरेषुयोगकरेष्वपिएक
राशेर्वृद्धिऱ्हासोवास्यान्नतुकक्ष्यायाइत्यर्थः अथसकलायुर्योगापवादत्वेननिधनयोगंस्थिरदशामालंब्याह २९ खंड
मनतिक्रम्ययथाखंडंस्थिरदशायांशशिनंदपावकाइतिवक्ष्यमाणायांदीर्घमध्याल्पायुर्भेदेनपूर्णायुषस्त्रेधाखंडकरणात्

**पूर्णेन्दुशुक्रयोरेकराशिवृद्धिः २८ शनौविपरीतं २९ स्थिरदशायांयथाखंडं**
**निधनं ३० तत्रर्क्षविशेषः ३१ पापमध्येपापकोणेरिपुरोगयोःपापेवा ३२**

खंडः समागतस्तस्मिन्नेवखंडेनिधनंभवतीत्यर्थः एवंचवक्ष्यमाणप्रकारेणनिधनाश्रयखंडात्पूर्वखंडेनिधनलक्षणा
क्रांतराशेर्दशायामागतायामपिननिधनंस्यात् किंतु क्लेशःस्यात् ३० अथदीर्घमध्याल्पायुर्भेदेनमरणखंडेनिर्णीतेन
विशेषतोमरणकालज्ञानमितःसंभवतीत्यत्राह तत्रनिधनेऋक्षविशेषःराशिविशेषोस्तीत्यर्थः ३१ सराशिविशेषःकइ
त्यपेक्षायामाह पापद्वयमध्यगतराशिदशायांप्रथमदशाप्रदराशेस्त्रिकोणेद्वादशाष्टमयोर्वापापयोगेसतितद्राशिदशायां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निधनंभवति एतदुक्तंवृद्धैः शुभमध्येमृतिर्नैवपापमध्येमृतिर्भवेदिति लग्नात्कारकाद्वापापाक्रांतत्रिकोणदशायांपापाक्रां तद्वादशाष्टमराशिदशायांवानिधनंभवतीत्यन्ये पुनरपिनिधनेराशिविशेषमाह ३२ तदीशयोर्द्वादशाष्टमेशयोर्ग्रहांतरदृष्टिरहितकेवलक्षीणेन्दुशुक्रयोर्दृष्टौसत्यांद्वादशाष्टमराशिदशयोर्निधनंभवतीत्यर्थः बहुवर्षव्यापिन्यांदशायांकदामरणमित्याशंकायामाह ३३ तत्रापिनिधनस्थानत्वेनादिष्टासुपापमध्यराश्यादिदशासुआद्यर्क्षारिनाथौप्रथमदशाप्रदराशि

**तदीशयोःकेवलक्षीणेन्दुशुक्रदृष्टौवा ३३ तत्राप्याद्यर्क्षारिनाथदृश्यनवभागाद्वा ३४ पितृलाभभावेशप्राणीरुद्रः ३५ अप्राण्यपिपापद्रष्टः ३६**

तत्षष्ठराशिनाथौताभ्यांदृश्योयोनवमभागोनवांशकुंडल्यांराशिस्तस्यांतर्दशायांवानिधनंभवतीत्यर्थः ननुआद्यशब्देनदशमराशिः अरिशब्देनषष्ठराशिरितिकैश्चिद्व्याख्यातम् तत्रवैषम्येबीजाभावादरिशब्देनाष्टमराशिः कुतोनगृह्यतइति एवंचेन्मुनेस्तात्पर्यतर्हितत्रापिरिष्फतंतुनाथदृश्यनवभागाद्वेतिकुतोनो्क्तमित्यलम् ३४ अथनिर्याणदशाविशेषंप्रकारान्तरेणदर्शयितुं रुद्रग्रहंलक्षयति लग्नसप्तमाभ्यांयावष्टमेशौतयोर्यः प्राणीबलवान्सरुद्रसंज्ञोग्रहोभवतीत्यर्थः द्वितीयरुद्रमाह ३५ लग्नसप्तमाभ्यांयोष्टमाधीशोदुर्बलः सोपिपापदृष्टश्चेद्रु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्र:स्यात् तथाचद्वौरुद्रौभवत:प्राणीअप्राणीचेति प्राणिरुद्रस्यफलमाह ३६ बलवतिरुद्रेशुभदृष्टेसतिरुद्रशूलांतंरुद्रा
त्प्रथमपंचनवमदशांतमायुर्भवति अल्पमध्यदीर्घायुर्योगभेदात्प्रथमद्वितीयतृतीयत्रिकोणांतेवाऽऽयु:समाप्तंभवतीत्य
र्थ: अप्राणिरुद्रेविशेषमाह ३७ तत्रद्वितीयेरुद्रेपिशुभयोगेसतिरुद्रशूलांतमायुर्भवति नतुशुभदृष्टयेतिभाव: ३८ उ
क्तयोगेअपवादमाह रविंविहायेतरपापयोगेसतिइदंफलंनभवति रवियोगेतुनास्यफलस्यभंगइति अथरुद्रद्वयस्यगुण
विशेषेणफलंदर्शयति ३९ प्राणिन्यप्राणिनिवारुद्रेमंदारेंदुदृष्टेशुभयोगाभावेएकोयोग: मंदारेन्दुदृष्टेरुद्रद्वयेपापयोगे

**प्राणिनिशुभदृष्टेरुद्रशूलांतमायु: ३७ तत्रापिशुभयोगे ३८ व्यर्कपापयो**
**गेन ३९ मंदारेंदुदृष्टेशुभयोगाभावेपापयोगेपिवाशुभदृष्टौवापरत: ४०**

पिवाद्वितीयोयोग: मंदारेन्दुदृष्टेरुद्रद्वयेशुभदृष्टौवासत्यांतृतीयोयोग: प्रथमयोगेशुभयोगाभावेइत्यनेनपापयोगेद्विती
ययोगेवक्तव्येशुभपापरहितेरुद्रेऽयमर्थ: संपन्न:योगत्रयेसंपूर्णेसतिरुद्रशूलांतात्परतोऽग्रेआयु:समाप्तिर्भवतीत्यर्थ:
वाकारद्वयमनास्थायामित्युक्तायोगद्वयपरमितिपंथैरुक्तम् तन्नवाकारद्वयस्यानास्थाकल्पनायांप्रमाणाभावाद्योगत्रयपर ॥२७॥
मेववाकारद्वयेनलभ्यतइति अस्मिन्प्रकरणेशुभपापावद्धैरुक्ता: अर्कारमंदफणिन:क्रमात्क्रूरायथाश्रयम् चंद्रोपिक्रूरए

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वात्रक्वचिदंगारकाश्रयें गुरुध्वजकविज्ञाःस्युर्यथापूर्वंशुभग्रहाइति अयमर्थः अत्रार्काद्याउत्तरोत्तरंयथाश्रयंक्रूरराशिग ताःक्रूराभवंति शुभराशिगतास्तुनपापाः किंतु शुभाएवगुर्वादयस्तुशुभाः यथापूर्वंबुधात्कविःकवेःकेतुःकेतोर्गुरुरिति क्रमेणोत्तरोत्तरंशुभाः क्रूरग्रहाणांयथाक्रूराश्रयेक्रूरत्वंशुभाश्रयेशुभत्वम् तथागुर्वादीनामपिशुभाश्रयेएवशुभतानक्रूराश्र येशुभताएवमेववृद्धैरप्युक्तम् प्रत्येकंशुभराशिस्थउच्चस्थोवाबुधःशुभः गुरुशुक्रौचसौम्यस्थौततोन्यत्राशुभाःस्मृताइति यदिशूलेमृतिस्तर्हिकस्मिन्शूलेस्यादित्यत्रवृद्धैर्विशेषोनिरुक्तः पापमात्रस्यशूलत्वेप्रथमर्क्षेमृतिर्भवेत् मिश्रेमध्यमशूल

**रुद्राश्रयेपिप्रायेण ४१ क्रियेपितरिविशेषेण ४२ प्रथममध्यमोत्तमेषुवातत्तदायुषां ४३**

र्क्षेशुभमात्रेंत्यभेमृतिरिति अस्यार्थः द्वौरुद्रौयदिपापौतर्हिप्रथमशूलेमृतिःस्यात् यद्येकोरुद्रः शुभोऽपरः पापस्तर्हिमध्य शूलेमृतिः द्वावपिरुद्रौयदिशुभौतर्ह्यंत्यशूलेमृतिःस्यादितिरुद्राश्रितराशावपिकदाचिन्मरणयोगमाह ४० रुद्राश्रय राशावप्यायुःसमाप्तिर्भवतीत्यर्थः प्रायःशब्दाद्रुद्राश्रयात्पूर्वंपरतोवाऽऽयुःसमाप्तिर्भवतिइतिध्वनितम् अत्रविशेषमाह ४१ मेषेजन्मलग्नेसतिविशेषेणरुद्राश्रयेआयुःसमाप्तिर्भवति योगभेदेननिधनस्थानंदर्शयति ४२ तत्तदायुषामल्पमध्य दीर्घायुर्योगवतांप्रथममध्यमोत्तमेषुप्रथमद्वितीयतृतीयरुद्रशूलेषुवाक्रमेणायुःसमाप्तिर्भवति रुद्रशूलराशिमहादशायां

For Private and Personal Use Only

निधनेसिद्धेकस्यामंतर्दशायांनिधनमित्यर्थः अत्रशूलेचेदित्युक्त्यारुद्रशूलनिर्याणयोगेसत्यपिबलवत्तरयोगांतरवशातो रुद्रशूलनिर्याणबाधोपिभवतीतिध्वनितम् अथफलविशेषकथनायमहेश्वरग्रहंलक्षयति ४ ३ स्वादात्मकारकाद्भावेशोऽष्टमराशीशोमहेश्वरग्रहइत्यर्थः ४ ४ यदिकारकादष्टमेशःस्वोच्चेस्वग्रहेवास्यात्तदाकारकात्द्वादशाष्टमेशयोर्मध्येयोबलीसएवमहेश्वरःस्यान्नतुस्वभावेशइत्यर्थः द्वावपितुल्यबलौचेत्द्वौमहेश्वरौभवतएवस्वोच्चेसग्रहइतिपाठेतुकारकोच्चराशौग्रहयुक्तेसतिकारकादष्टमद्वादशेशयोर्मध्येयोबलीसमहेश्वरः अस्मिन्पक्षेप्रकारांतरेणायमपिमहेश्वरइत्यर्थः प्र

**स्वभावेशोमहेश्वरः ४४ स्वोच्चेस्वगृहेरिपुभावेशप्राणी ४५ पाताभ्यांयोगेस्वस्यतयोर्वारोगेततः ४६ प्रभुभाववैरीशप्राणीपितृलाभप्राण्यनुचरोविषमस्थोब्रह्मा ४७**

कारांतरेणमहेश्वरमाह ४५ स्वस्यकारकस्यपाताभ्यांराहुकेत्वोरन्यतरेणयोगेतथाकारकाद्रोगेऽष्टमेतयोराहुकेत्वोर्योगेवासतिकारकात्र्व्यादिप्रसिद्धगणनयाततःषष्ठोग्रहोमहेश्वरोभवति द्वित्राणांमहेश्वराणांसंभवेयोबलीसएवमहेश्वरःस्यादिति अथब्रह्मग्रहमाह ४६ पितृलाभप्राणीतिसूत्रमध्येस्थितत्वाद्देहलीदीपकन्यायेनलग्नसप्तमयोर्योबलवद्राशिस्तस्मात्षष्ठाष्टमद्वादशराशिस्वामिनांमध्येयोबलवान्भवेद्विलग्नतत्सप्तमराश्योर्मध्येयोबलवद्राशिस्तत्पृष्ठगश्चसन

मेषमिथुनादिविषमराशिगतःस्यात् सएवग्रहोब्रह्माभवतीतिलग्नस्यपृष्ठराशयः सप्तमादिद्वादशांतासप्तमस्यपृष्ठराश योलग्नादिषष्ठांतांबोध्याः प्रकारांतरेणब्रह्माणमाह ४७ शनौब्रह्मणिब्रह्मलक्षणाक्रांतेसतिपातयोराहुकेत्वोर्वाब्रह्मणोः सतोस्तस्माच्छनेराहोः केतोर्वाततःषष्ठो ग्रहोब्रह्माभवतीत्यर्थः नतुब्रह्मलक्षणाक्रांततयाप्रसक्तः शन्यादिर्ब्रह्मास्यात् बहूनांब्रह्मलक्षणाक्रांतत्वेकतमोब्रह्मास्यादित्याशंकायामाह ४८ बहूनांग्रहाणांब्रह्मयोगेसतिस्वजातीयःकारकजातीयोऽधिकांशकोब्रह्मास्यादित्यर्थः ४९ अत्रैवविशेषमाह राहोर्ब्रह्मणासहसंयोगेसतिविपरीतंबहूनांब्रह्मणांमध्येयो

**ब्रह्मणिशनौपातयोर्वाततः ४८ बहूनांयोगेस्वजातीयः ४९ राहुयोगेविपरीतं ५०**

**ब्रह्मास्वभावेशोभावस्थः ५१**

न्यूनांशकः सएवब्रह्मास्यात् शनिराहुकेतूनांततइत्युक्त्याब्रह्मत्वाभावात् ब्रह्मत्वेसतितुराहोर्ब्रह्मत्वयोगेराहुर्न्यूनांशश्चेद्ब्रह्मास्यादित्यर्थः स्यादिति पुनःप्रकारांतरेणब्रह्माणमाह ५० कारकादष्टमेशः कारकादष्टमस्थश्चग्रहोब्रह्मास्यात् यत्तु अष्टमेशत्वेसत्यष्टमराशिगतत्वमेव ब्रह्मत्वेप्रयोजकत्वमितिमतंतन्नतथासेतिविवादप्रसक्त्यभावेनैतत्सूत्रमनन्वितंस्यात् नह्येतत्पूर्वान्वितंव्यवहितत्वादग्रथास्वारस्यप्रसक्तेः बहूनामितिसूत्रेणैवशंकायाःउपक्षीणत्वाच्चेति अष्टमेशाष्टमस्थयोरेकत्वेनिर्विवादं ब्रह्मत्वंतयोर्भेदे

तुकतमोभवेदित्यत्राह ५१ विवादेद्वयोर्ब्रह्मत्वेसतियोवलीसएवब्रह्मास्यात् अथवासर्वेषुब्रह्मसुसमानांशवत्सुयोऽग्र
हात्सग्रहइत्यादिनाबलीसब्रह्माभवतीत्यर्थः अथब्रह्ममहेश्वरयोःफलमाह ५२ स्थिरदशायांब्रह्मग्रहाश्रितराशिमार
भ्यमहेश्वरराशिदशापर्यंतमायुर्भवतीत्यर्थः महादशायांनिधनाश्रयीभूतामंतर्दशामाह ५३ तत्रापिमहेश्वराश्रितरा
शिमहादशायामपिमहेश्वराश्रितराशितोऽष्टमराशिनाथस्ययस्त्रिकोणराशिः प्रथमपंचमनवात्मकोराशिस्तस्यैकाद्या
त्मकोयोंतर्दशाकालस्तत्रमृत्युःस्यात् अब्दइति द्वादशवर्षैस्तस्तद्राशिदशेत्यभिप्रायेणन्यूनसंख्ययादशासत्वेत्वब्दतो

**विवादेबली ५२ ब्रह्मणोयावन्महेश्वरर्क्षदशांतमायुः ५३ तत्रापिमहे**
**श्वरभावेशत्रिकोणाब्दे ५४ स्वकर्मचितरिपुरोगनाथप्राणीमारकः ५५**

न्यूनमंतर्दशास्वप्यानेयमेव अथसूत्रद्वयेनमारकग्रहंलक्षयति ५४ चित्तनाथःप्रायेणस्वस्मादात्मकारकात्तृतीयषष्ठद्वा
दशाष्टमेशानांमध्येयोबलवान् समारकग्रहइत्यर्थः सर्वेषांसमबलत्वेसर्वेपिमारकास्युः बहूनांमारकत्वेकस्यदशायां
निधनमित्याशंकायांअल्पमध्यदीर्घायुषांयत्रयत्रयस्यसंभवस्तद्राशिदशायांनिधनमित्यर्थः षष्ठेशस्तुप्रायेणमुख्यतया
मारकइत्यर्थः अत्रवृद्धैरप्युक्तम् षष्ठाष्टमेशौभवतोमारकावष्टमेश्वरः प्रायेणमारकोराशिदशास्वत्राविशेषतः षष्ठभे



For Private and Personal Use Only

पापभूयिष्टेषष्ठेशोमुख्यमारकः षष्ठात्रिकोणगोवापिमुख्यमारकइष्यते मध्यायुषिमृतिःषष्ठदशायामष्टमस्यवा षष्ठात्रि कोणस्थपुनर्दीर्घाल्पविषयेभवेत् षष्ठेबलयुतेतस्यत्रिकोणेमृतिमादिशेत् षष्ठेशश्चेद्बलाढ्यःस्यातत्रिकोणेमृतिंवदेदिति व्यवस्थेयंसमस्तापिकारकादिदशास्वपिबलिनः शुक्रशशिनोर्ग्राह्यं षष्ठाष्टमादिकंश्लोकाःस्पष्टार्थाः ५५ मारकस्यफ लमाह मारकग्रहाश्रितस्यमारकस्वामिकस्यवामहादशाचरस्थिरादिरूपायांनिधनंस्यादित्यर्थः ५६ मारकमहादशा यांनिधनाश्रयीभूतामंतर्दशामाह तत्रापिमारकग्रहदशायामपिकालात्कारक सप्तमात्द्वादशाष्टमषष्ठेशानामंतर्दशायां

## तदृक्षदशायांनिधनं ५६ तत्रापिकालाद्रिपुरोगचित्तनाथापहारे ५७

निधनंस्यादित्यर्थः एषांमध्येबलवतोंतर्दशायांनिधनमितिविवेचनीयम् अत्रविशेषोवृद्धैरुक्तम् चरेचरस्थिरद्वंद्वाइतियो राशिरागतः सएवमारकोराशिर्भवतीतिविनिर्णयः बहुराशिसमावेशेबलवान्मारकःस्मृतइति अयंभावः पितृदिनेशा दिद्विकानामाश्रयीभूतोयोराशिः समारकस्तेराशयोयदिबहवस्तर्हिअग्रहात्सग्रहइत्यादिबलेनयोराशिर्बलवान्समा रकस्तद्राशिदशायांतदीशाश्रयराशिदशायांवामृतिरिति अपरेतु चरइत्यादिनायुर्यत्तत्समात्युचितोभवेत् योराशिःसतु विज्ञेयोमारकःसूत्रसंमतइति चरइत्यादिश्लोकेनयद्दीर्घाद्यायुःसमागतंपूर्णमित्यादिनास्पष्टीकृतम् तदायुर्यद्राशौसमाप्तं

तद्राशिरेवमारकइत्यर्थः ५७ इतिजैमिनिसूत्रव्याख्यायांसुबोधिन्यांद्वितीयाध्यायस्यप्रथमःपादः ॥ १ ॥ ॥ ७ ॥
पित्रादिनांनिधनकालंबोधयितुंपित्रादिकारकमुपदिशति सूर्यभार्गवयोर्मध्येयोबलवान्सपितृकारकःस्यात् १ चंद्रभौ
मयोर्योर्बलीसमातृकारकः २ रविशुक्रयोश्चंद्रारयोश्चमध्येयोनिर्बलः सोपिपापग्रहदृष्टश्चेद्यथाक्रमंपितृमातृकारकंतां
लभते अथप्राणिपित्रादिकारकस्यफलमाह ३ पितृकारकेमातृकारकेवाप्राणिनिशुभदृष्टेसतिपितृमातृकारकाश्रितरा

**रविशुक्रयोःप्राणीजनकः १ चान्द्रारयोर्जननी २ अप्राण्यपिपापदृष्टः ३ प्राणिनि शुभदृष्टेतच्छूलेनिधनंमातापित्रोः ४ तद्भावेशेस्पष्टबले ५ तच्छूलइत्यन्ये ६ आयुषिचान्यत् ७ अर्कज्ञयोगेतदाश्रयेक्रियेलग्नमेषदशायांपितुरित्येके ८**

शित्रिकोणदशायांपितुर्मातुश्चमरणंज्ञेयं द्विविधकारकस्यफलमाह ४ स्पष्टं ५ ताभ्यांप्राण्यप्राणिकारकाभ्यांभावेशेऽष्ट
मेशेपितृमातृकारकात्स्पष्टबलेऽधिकबलेसत्यष्टमेशाश्रितराशितस्त्रिकोणराशिदशायांनिधनंभवतीत्यन्येप्राहुः अधिब
लइतिवक्तव्ये स्पष्टबलइत्युक्त्यांशाधिक्यबलमत्रग्राह्यम् ६ पित्रादीनामायुषिविचारणीये अन्यच्च तत्तत्कारकंप्रकारांत
रोक्तनिर्याणशूलदशादिकंचविचार्यमित्यर्थः पितृनिधनेविशेषमाह ७ क्रियेलग्नात्द्वादशराशौतदाश्रयेर्कबुधाश्रये





For Private and Personal Use Only

सिंहमिथुनकन्यान्यतरराशिसत्वेऽर्केज्ञयोगेसूर्यबुधयोर्योगेसतिलग्नमेषदशायांलग्नात्पंचमराशिदशायांपितुर्निधनंस्या दित्येकेवदंति लग्नेइतिपाठेतुक्रियेमेषराशौरविज्ञयोगाश्रयेलग्नेसतिमेषस्यदशायांपितुर्निधनमित्यर्थः ८ अथ बाल्यएवमातापित्रोर्मरणयोगमाह पित्रोःमातापितृकारकयोः प्राणिनोरप्राणिनोर्वारविरहितपापमात्रेणदृष्टयोः स तोर्द्वादशाब्दात्पूर्वमेवमातापित्रोर्यथाक्रमंनिधनंभवति रविशुभदृष्टौनायंयोगइतिस्त्रीनिधनमाह ९ गुर्वाश्रितराशि

**व्यर्कपापभ्रात्रदृष्टयोःपित्रोःप्राग्द्वादशाब्दात् ९ गुरुशूलेकलत्रस्य १० तत्तच्छूलेतेषां ११ कर्मणिपापयुतदृष्टेदुष्टंमरणं १२ शुभंशुभदृष्टियु ते १२ मिश्रेमिश्रं १३ आदित्येनराजमूलात् १४**

त्रिकोणदशायांपत्नीनिधनंस्यात् एवमन्येषामपिनिधनमाह १० पुत्रमातुलादिकारकराशेस्त्रिकोणदशायांपुत्रमातुला देर्निधनमित्यर्थः मरणेशुभाशुभभेदंदर्शयतिसूत्रैः ११ लग्नात्कारकाद्वातृतीयेपापेनयुतेदृष्टेवादुष्टंमरणंभवति १२ लग्नात्कारकाद्वातृतीयेशुभेनयुक्तेदृष्टेवाशुभंमरणंस्यात् अग्निजलपातबंधनादिप्रयोज्यंदुष्टंमरणज्वरादिरोगप्रयोज्यंशु भमुच्यते १२ शुभपापयोर्द्वयोरपिदृष्टौयोगेवाशुभाशुभात्मकंमरणमित्यर्थः मरणनिमित्तानिदर्शयति १३ तृतीयेर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वियोगेदृष्टौवासत्यांराजहेतोर्मरणम् १४ तृतीयेचंद्रेणयुतेदृष्टेवायक्ष्मतःक्षयरोगान्मरणम् १५ तृतीयकुजेनयुतेदृष्टेवा व्रणादितोनिधनम् १६ तृतीयेशनिनायुतेदृष्टेवातरोगतोनिधनम् १७ तृतीयेशनिगुलिकाभ्यांयुतेदृष्टेवाविषादिभिर्मरणम् गुलिकस्यस्पष्टीकरणमन्यत्रानुसंधेयम् १८ तृतीयेकेतुनायुतेदृष्टेवाविषूच्यादितोमरणम् १९ तृतीयेचंद्रगुलिकाभ्यांयुतेदृष्टेवाक्रमुकमदादिनासत्वरंमरणम् २० तृतीयेगुरुणायुतेदृष्टेवाशोफादिभिर्निधनम् २१ तृतीयेशुक्रेणयुतेदृष्टे

**चंद्रेणयक्ष्मणः १५ कुजेनव्रणशस्त्राग्निदाहाद्यैः १६ शनिनावातरोगात् १७ मंदमांदिभ्यांविषसर्पजलोद्बंधनादिभिः १८ केतुनांविषूचीजलरागाद्यैः १९ चंद्रमांदिभ्यांपूगमदान्नकवलोदिभिःक्षणिकं २० गुरुणाशोफाऽरुचिवमनाद्यैः २१ शुक्रेणमेहात् २२ मिश्रेमिश्रात् २३ चंद्रदृग्योगान्निश्चयेन २४ शुभैःशुभेदेशे २५ पापैःकीकटे २६**

वाप्रमेहरोगान्निधनम् २२ तत्तद्रोगानांबहूनांतृतीयेयोगेदर्शनेवाऽनेकरोगान्निधनम् २३ तृतीयेतत्तद्ग्रहयोगदर्शनसत्वेतत्रैवचंद्रदृष्टियोगसत्वेतत्तद्रोगान्निश्चयेनमरणंवक्तव्यमित्यर्थः एतेनचंद्रदृग्योगाभावेतृतीयस्थानगेनापितत्तद्ग्रहेणतत्तद्रोगमरणेसंदेहइतिध्वनितम् अथनिधनेदेशभेदंदर्शयतिसूत्राभ्यां २४ स्पष्टम् २५ अत्रबहुत्वमविवक्षितंतृती



For Private and Personal Use Only

येशुभदृग्योगसत्वेशुभेदेशेपुण्यभूमौमरणं पापैस्तुकीकटेमगधादिपापदेशेमरणमित्यर्थः शुभपापोभययोगेतुनकाश्या दिशुभेनमगधादिपापेदेशइति मृतौज्ञानाज्ञानपूर्वकत्वमाह २६ स्पष्टम् २७ लग्नात्कारकात्तृतीयगुरुशुक्राभ्यांयुतेदृ ष्टेवाज्ञानपूर्वंमरणम् गुरुशुक्रातिरिक्तयोगदर्शनाभ्यामज्ञानपूर्वमरणंफलांतरमाह २८ लग्नद्वादशयोर्मध्येशनिराव्होः शनिकेत्वोर्वास्थित्यामातापित्रोःसंस्कर्तानस्यात् लग्नद्वादशमध्यंप्रकटयति २९ लग्नादिपूर्वार्द्धेलग्नादिप्रथमषट्केद्वा दशाद्यपरार्द्धेद्वादशाद्युत्तरषट्केशनिराहुशनिकेतुसत्वेमातृपित्रोःक्रमात् संस्कर्तानतथाचलग्नादिषट्केशनिराहुशनिकेतुस

**गुरुशुक्राभ्यांज्ञानपूर्वं २७ अन्यैरन्यथा २८ लेपनजनकयोर्मध्येशनिराहुकेतुभिः पित्रोर्नसंस्कर्ता २९ लेपादिपूर्वार्द्धेजनकाद्यपरार्द्धे ३० शुभदृग्योगान्न ३१॥ इति॥**

त्वेमातुःसंस्कर्तानसप्तमादिषट्केशनिराहुशनिकेतुसत्वेपितुःसंस्कर्तानेतिफलितार्थः शन्यादित्रिकसत्वेइतिकुतोनोक्त मितिचेत् राहुकेत्वोरेकस्थानस्थितेर्बाधत्वान्नोक्तमिति अपवादमाह ३० तत्रलग्नादिद्वादशादिमध्येशुभदृग्योगसत्वेपू र्वोक्तयोगोनस्यात्किंतुपित्रोःसंस्कर्तास्यात् ३१ इतिश्रीजैमिनिसूत्रव्याख्यायांसुबोधिन्यांद्वितीयाध्यायस्यद्वितीयःपा दः ॥२॥ अथदशाभेदबलभेदादीनाह तत्रादौनवांशदशामाह विषमेलग्नेसतितदादिलग्नादिर्नवांशदशास्यात् अन्यथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सप्तमराशौलग्नेसत्यादर्शादिः सप्तमराश्यादिर्नवांशदशास्यात् आदर्शःसंमुखोभवति संमुखराशिःसप्तमएवभवति एतद्द
शायांप्रतिराशिनवनवाब्दाभवंतीतिनवांशदशेतिनामधेयंज्ञेयम् यत्तु स्थिरराशेःषष्ठेराशिश्चरस्याष्टमएवसः द्विस्वभावस्य
राशिस्तुसप्तमः संमुखोमतइतिश्लोकंकृत्वासंमुखत्वंपथैरुक्तं तन्न तद्दृष्टिपरमेवनत्वन्यपरं अथस्थिरदशामाह १ स्पष्टम् २
चरस्थिरद्विस्वभावराशीनांक्रमेणसप्ताष्टनवाब्दानियताःस्थिरदशायांभवंतीत्यर्थः तथाचमेषेसप्तवृषेष्टौमिथुनेनवपुनःक

**विषमेतदादिर्नवांशः १ अन्यथाऽऽदर्शादिः २ शशिनंदपावकाः**
**क्रमादब्दाःस्थिरदशायां ३ ब्रह्मादिरेषा ४ अथप्राणः ५ कारक**
**योगःप्रथमोभानां ६ साम्येभूयसा ७ ततस्तुंगादिः ८**

र्केसप्तेत्यादिक्रमेणद्वादशराशिपर्यंतमब्दाज्ञातव्याः एतद्दशारंभस्थानमाह ३ एषादशाब्रह्मग्रहादिर्ब्रह्मग्रहाश्रितराशि
मारभ्यप्रवर्तनीयेत्यर्थः अथबलमधिकरोति ४ अथानंतरंप्राणोबलमुच्यते ५ राशीनामाद्यंबलंकारकयोगोभवति ६
ग्रहयोगसाम्येउभयत्रग्रहसत्वेसतिभूयसाग्रहयोगेनबलंभवति ग्रहयोगभूयस्त्वादिभिरपिसाम्येनिर्णायकमाह ७ त
तोभूयस्त्वानंतरंतुंगादिर्बलंस्यात् राशेस्तुंगस्वगृहस्थमित्रगृहस्थग्रहयोगः प्राणइत्यर्थः अथराशीनांनिसर्गबलमाह ८



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततस्तुंगादिबलानंतरंनिसर्गबलंग्राह्यं चरात्स्थिरः स्थिरात्द्विस्वभावोबलीत्यर्थः तदुक्तंवृद्धैः अग्रहात्सग्रहोज्यायान्स ग्रहेष्वधिकग्रहः साम्येचरस्थिरद्वंद्वाःक्रमात्स्युर्बलशालिनइति ९ राशौतदभावेकारकयोगाद्यभावेस्वामिनोराश्या धिपतेरित्थंभावः कारकयोगादिर्बलंयद्राशिनाथोबलवान्सराशिर्बलीतिभावः १० एकराशौबहुग्रहेषुसत्सुतेषांराशि द्वारकबलसाम्येपि अत्रास्मिन्ग्रंथेआग्रायतोग्रहोविशेषाद्बलीभवति अग्रमायतःगतः अग्रायतः अग्रायतएवआग्राय तः अधिकांशकइतियावत् तथाचबहुग्रहेष्वेकराशिस्थेष्वधिकांशकोबलवानिति ११ पुरुषेओजराशौप्रतिवेशिकः

**निसर्गस्ततः ९ तदभावेस्वामिनइत्थंभावः १० आग्रायतोत्रविशेषात् ११ प्रातिवेशि कःपुरुषे १२ इतिप्रथमः १३ स्वामिगुरुज्ञदृग्योगोद्वितीयः १४ स्वामिनस्तृतीयः १४**

पार्श्वराशिवर्तीद्विद्वादशगतोपिग्रहः स्वस्यबलकर्त्तास्यात् १२ इतिप्रोक्तप्रकारेणप्रथमः प्राणउक्तइत्यर्थः १३ स्वामियोगोगुरुयोगोबुधयोगश्चैकैकशोराशीनांबलंभवति स्वामिदृष्टिर्गुरुदृष्टिर्बुधदृष्टिश्चैकैकशोद्वादशराशीनांबलं स्यात् एवंषड्बलानिद्वितीयःप्राणइत्यभिधीयते द्वितीयंभावबलमित्यग्रिमसूत्रेद्वितीयंबलंग्राह्यमितिस्पष्टीकृतम् १४ स्वामिनोराश्याधिपतेर्वक्ष्यमाणः प्राणस्तृतीयःप्राणइत्यर्थः अथस्वामिबलाबलेदर्शयति १४ स्वादात्मकारकात्कंट

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कादिषुकेंद्रपणफरापोक्लिमेषुस्वामिनोऽपारदौर्बल्यंभवति केंद्रेशून्यंपणफरेएकंआपोक्लिमेद्विगुणंदौर्बल्यंभवंति १५
चतुर्थतःपापदृग्योगइत्यादिनावक्ष्यमाणचतुर्थबलादपिपुरुषेविषमराशौबलंभवतीत्यर्थः यत्तु चतुर्थतःप्रथमांतात्तासि
रित्युक्त्वापुरुषेचतुर्थःप्राणइतिकैश्चिदुक्तं तदयुक्तंएवंचेन्मुनेस्तात्पर्यंतर्हिचतुर्थःपुरुषेइत्येवब्रूयात चतुर्थबलंकिमितिशं
कानिरासायेति चत्वारइत्यग्रेवक्ष्यति ननुतद्बलमप्यत्रैवकुतोनोक्तमिति चेत् तद्बलस्यसांप्रतमनुपयोगादुपयोगिबलमु
क्त्वाकाश्चनदशाःप्रदर्श्यवक्ष्यतीति अथनिर्याणशूलदशामाह १६ लग्नसप्तमयोर्यःप्रथमन्बलवान्तदादिगणनयाप्रवृत्तद

**स्वात्स्वामिनःकंटकादिष्वपारदौर्बल्यं १५ चतुर्थतःपुरुषे १६ पितृलाभप्रथमप्राण्यादिशू
लदशानिर्याणे १७ पितृलाभपुत्रःप्राण्यादिःपितुः १८ आदर्शादिर्मातुः १९ कर्मादिर्भ्रातुः २०**

शपापदालग्नसप्तमान्यतरत्रिकोण १।५।९ राशिदशातदानिर्याणंभवतीत्यर्थः अत्रनवनवाब्दाग्राह्याः पुरुषेसमाःसामा
न्यतइतिसूत्रस्यवक्तव्यत्वात् पितुर्निर्याणदशामाह १७ लग्नसप्तमयोर्यौपुत्रराशनिवमराशितयोर्मध्येयोबलवान् तमार
भ्यक्रमेणप्रवर्तितयादशयाप्रोक्तरीत्याशूलदशायांपितुर्निर्याणंभवति मातुर्निर्याणदशामाह १८ लग्नात्सप्तमाद्वाबलिनश्च
तुर्थराशेःशूल १।५।९ दशायांमातुर्निर्याणंस्यात् १९ लग्नात्सप्तमाद्वाबलिनस्तृतीयराशेः शूलदशायांभ्रातुर्निर्याणं २०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मातृआदिरितिपदच्छेदः लग्नात्सप्तमाद्वाबलिनः पंचमराशेः प्रवृत्तशूलदशायांभगिनीपुत्रयोर्निर्याणम् २१ लग्नात्स प्तमाद्वाबलिनएकादशराशेःप्रवृत्तायांदशायांततः शूलदशायांज्येष्ठभ्रातुर्निर्याणम् २२ लग्नात्सप्तमाद्वाबलिनोन वमराशेःप्रवृत्तायांदशायांततः शूलदशायांपितृवर्गस्यपितृव्यादेर्निर्याणंस्यात् अथब्रह्मदशामाह २३ पुरुषेविषमेज न्मलग्नेसतिब्रह्मादिब्रह्मग्रहाश्रितंराशितोदशाप्रवर्तनीयाः समादासांताःकोर्थः स्वराशेःषष्ठराशिस्वाम्यंतंसमादशा ब्दाग्राह्याः ननुदासांतशब्देनषष्ठराशिस्वाम्यंतमित्यर्थः कथमितिचेत्शृणुषष्ठराश्यंतवर्षानयनेसर्वेषांसमत्वाद्वासप्त

**मात्रादिर्भगिनीपुत्रयोः २१ व्ययादिर्ज्येष्ठस्य २२ पितृवत्पितृवर्गे २३ ब्रह्मादिपुरु षेसमादासांताः २४ स्थानव्यतिकरः २५ पापदृग्योगाःतुंगादिग्रहयोगः २६**

त्युत्तरवर्षाभावाच्चायोग्यत्वात्स्वाम्यंतमित्यर्थः संपन्नइतिचेद्वर्षानयनेब्रह्मादिगणनातदापुरुषेब्रह्मादिसमादासांताइ तिसूत्रंप्रणीतंस्यादित्यलम् २४ तत्रस्थानव्यतिकरः सप्तमसंबंधोस्ति अयंभावः विषमेआदौब्रह्माश्रितराशिदशाततः क्रमेणान्येषांसमेलग्नेतुआदौब्रह्माश्रितसप्तमराशिदशाततोव्युत्क्रमेणान्येषांराशीनांदशाः विषमेब्रह्मादिसमेतुब्रह्म सप्तमादिक्रमव्युत्क्रमभेदेनदशाआनेयाइतिफलितार्थः अथचतुर्थबलमाह २५ पापग्रहाणांदृष्टियोगश्चराशेर्बलंभ

For Private and Personal Use Only

वति तुंगमूलत्रिकोणस्वर्क्षातिमित्रमित्रराशिस्थितशुभग्रहयोगश्चबलंस्यादित्यर्थः यत्तु तुंगादीतिग्रहयोगइतियोगावि भागंकृत्वातुंगादिबलंग्रहयोगबलंचेत्युक्तंपंथैस्तन्नपापदृग्योगइतिसूत्रेणपापयोगबलमुक्तमेवग्रहयोगइतिसूत्रेणैवतदर्थ लाभात्पापदृगित्येववक्तव्येयोगपदंव्यर्थंस्यात् तस्मात्पापग्रहाणांयत्रकुत्रस्थितानामपियोगेबलंशुभग्रहाणांतुतुंगादि स्थानामेवयोगेबलंनत्वन्यत्रस्थानामितिभावः इतिचत्वारःकारकयोगइत्यादिनात्रयःपूर्वोक्ताःएकोयमितिचत्वारः प्रा णाइत्यर्थः पूर्वोक्तचरदशायांक्रमव्युत्क्रमभेदमाह २६ त्रिभिस्त्रिभिर्भैरसमंचपदानिचत्वारिभवंति चक्रइति लग्नान्न

**पंचमेपदक्रमात्प्राक्प्रत्यक्कं १७ चरदशायामत्रशुभःकेतुः २८ ॥७॥ द्वितीयंभावबलंचर नवांशे १ दशाश्रयोद्वारं २ ततस्तावतिथंवाह्यं ३**

वमेओजपदांतर्गतराशिश्चेत्क्रमात् युग्मपदां तर्गतराशिश्चेद्व्युत्क्रमाद्दशानेयापूर्वंचरदशावर्षानयनमात्रमुक्तं क्रमव्युत्क्रमभेदस्तुनोक्तस्तस्मादत्रोक्तं दशारंभावधे रनुक्तत्वाल्लग्नमेवात्रग्राह्यमिति २७ अस्यांचरदशायांकेतुःशुभःशुभग्रहफलदइति२८ इतिश्रीजैमिनिसूत्रव्याख्यायां सुबोधिन्यांद्वितीयाध्यायस्यतृतीयःपादः॥३॥ चरराशेर्नवांशदशायांद्वितीयंभावबलंस्वामिगुरुज्ञदृग्योगइतिफलादेशा यग्राह्यमित्यर्थः अथाद्वारबाह्यराशीदर्शयति १ स्पष्टम् २ यस्मिन्कालेयस्यराशेर्यादशाचरस्थिरपर्यायतस्तद्दशाश्रयोरा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिर्द्वारमित्युच्यते एनमेवपाकराशिरितिव्यवहरति लग्नाद्यावत्संख्याकोद्वारराशिस्तस्मात्तावत्संख्याकोराशिर्बाह्य मितिनिगद्यते एनमेवभोगराशिंवदंति अत्रलग्नशब्देनजन्मकालेयद्राशितः प्राथमिकीदशासमारभ्यतेसराशिर्ग्राह्यः लग्नंसप्तमोवाब्रह्मग्रहाद्याश्रितराशिर्वायथायोगमाद्यदशाश्रयराशिरेवपाकराशेरवधिर्नतुप्रसिद्धंलग्नंएवंचेन्नोच्यतेतर्हि सएवभोगराशिश्चपर्यायेप्रथमेस्मृतइतिनलगति यत्रसप्तमाद्ब्रह्माश्रितराशितोवादशाप्रवृत्तिस्तत्रयःपाकराशिसएवभो गराशिरितिनसंभवति तदुक्तंवृद्धैः चरेऽनुज्झितमार्गःस्यात्षष्ठषष्ठादिकाःस्थिरे उभयेकंटकाज्ञेय।लग्नपंचमभाग्यतः १

## तयोःपापेबंधयोगादिः ४ स्वर्क्षेस्यतस्मिन्नोपजीवस्य ५

चरस्थिरद्विस्वभावेष्वजेषुप्राक्क्रमोमतः तेष्वेवत्रिषुयुग्मेषुग्राह्यंव्युत्क्रमतोखिलम् एवमुल्लिखितोराशिःपाकराशिरिति स्मृतः सएवभोगराशिश्चपर्यायेप्रथमेस्मृतः लग्नाद्यावतिथःपाकःपर्यायेयत्रदृश्यते तस्मात्तावतिथोभोगःपर्यायेतत्र गृह्यतां तदिदंचरपर्यायस्थिरपर्याययोर्द्वयोः त्रिकोणाख्यदशायांचपाकभोगप्रकल्पनमिति पर्यायेदशायामित्यर्थः ३ अथद्वारबाह्ययोःफलमाह त्रिभिस्सूत्रैःतयोर्द्वारबाह्ययोः पापग्रहेसतितद्दशायांबंधादिःस्यात् तदुक्तंवृद्धैः पाकेभोगेच पापाढ्येदेहपीडामनोव्यथेति ४ तस्मिन्द्वारेबाह्येवाराशौपापाश्रयीभूतेऽस्यपापस्यपरंतूपजीवस्यउपसमीपेजीवोय

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्येतिगुरुसमीपवर्तिनः स्वर्क्षेस्थितौसत्यांनबंधादिरित्यर्थः पाकभोगाश्रितः पापोयदिस्वर्क्षेगुरुयुक्तस्तर्ह्युक्तदोषोनेति यावत् ५ अस्मिन्द्वारेबाह्येवाराशिखेटाभ्यांयातायेयोगास्तेषूक्तम् सर्वंशुभाशुभंफलंवेदितव्यमित्यर्थः अथकेंद्रदशारंभस्थानभेदंदर्शयति ६ लग्नसप्तमयोर्बलवानराशिस्तस्मादयंवक्ष्यमाणदशाक्रमोज्ञेयस्तंराशिमारभ्यदशाप्रवर्तनीयेति यावत् तदुक्तंवृद्धैः बलिनःशुक्रराशिनोःकेंद्राख्यांतुदशांनयेत् पुरुषश्चेत्ततोनयास्त्रीचेद्दर्पणतोनयेत् अयमर्थः पुरुषोजातकवान्चेल्लग्नसप्तमयोर्बलवतोदशानेयास्त्रीजातकवतीचेद्बलवत्सप्तमाद्दशानेयेति केंद्रदशाक्रमभेदानाहसूत्रैः ७ प्रथ

## भग्रहयोगोक्तंसर्वमस्मिन् ६ पितृलाभप्राणितोयं ७ प्रथमेप्राक्प्रत्यक्त्वं ८

मेचरराशौलग्नेसप्तमेवासतिबलवल्लग्नसप्तमान्यतरराशेरनुज्झितमार्गेणदशाक्रमःस्यात् तत्राप्योजयुग्मप्रदभेदात्प्राक्प्रत्यक्त्वंक्रमोत्क्रमत्वंप्रथमद्वितीयादिद्वादश्यादिरीत्याज्ञेयमित्यर्थः यत्तुसामान्यपरिभाषातः प्राक्प्रत्यक्त्वंप्राप्तमेवात्रत्यं प्राक्प्रत्यक्त्वपदमनुज्झितक्रमपदमितिपंथैरुक्तं तन्न सामान्यपरिभाषायादशानयनपरत्वात् नचैवंसत्यनुज्झितक्रमरूपोर्थोनस्यादितीवाच्यं स्थिरद्व्यंगयोःषष्ठकेंद्रादिक्रमयोर्वक्ष्यमाणत्वादत्राक्षेपादेवतल्लाभात् अन्यथालाघवात्प्रथमेक्रयतइत्येवंब्रूयात् अत्रत्यंपंचमेपदक्रमादितिसूत्रोक्तंचप्राक्प्रत्यक्त्वपदंदशाक्रमेणसासान्यपरिभाषाऽप्राप्तौलिंगं ८



For Private and Personal Use Only

द्वितीयेस्थिरराशौलग्नेसप्तमेवासतिबलवछ्लग्नसप्तमान्यतमराशेः ओजयुग्मपदभेदाक्रमोत्क्रमाभ्यांरवितःषष्ठषष्ठक्रमेण दशाप्रवृत्तिर्ज्ञेयेत्यर्थः ९ तृतीयेद्विस्वभावराशौलग्नेसप्तमेवासतिबलवछ्लग्नसप्तमान्यतमराशेश्चतुर्थादिकेंद्रादितः पृथक्क्रमेणलग्नपंचमनवमादितः ओजयुग्मपदभेदाक्रमोत्क्रमाभ्यांदशाप्रवृत्तिःस्यात् लग्नसप्तमान्यतरकेंद्रात्प्रथमंततः पंचमपणफरतःततोनवमापोक्लिमतोदशाप्रवृत्तिर्ज्ञेयेतियावत् अत्रनवनवाब्दाग्राह्याः एतत्सूत्रत्रयस्यफलितार्थोवृद्धैः स्पष्टीकृतः चरेनुझ्झितमार्गःस्यात्षष्ठषष्ठादिकाःस्थिरे उभयेकंटकाज्ञेयालग्नपंचमभाग्यतः चरस्थिरद्विस्वभावेष्वोजेषु

## द्वितीयरवितः ९ पृथक्क्रमेणतृतीयेचतुष्टयादि १० स्वकेंद्रस्थाद्याःस्वामिनोनवांशानां ११

प्राक्क्रमोमतः तेष्वेवत्रिषुयुग्मेषुग्राह्यंव्युत्क्रमतोखिलं ओजेषुओजपदेष्वित्यर्थः अथकारककेंद्रादिदशामाह १० नवांशदशाब्दानांस्वकेंद्रस्थाद्याःकारककेंद्रस्थाद्याराशयःस्वामिनोभवंति आदौकेंद्रस्थास्ततःपणफरस्थास्ततआपोक्लिमस्थास्तत्रापिबलाधिकस्यप्रथममितिक्रमेणसर्वदुर्बलांतंनेयमितियावत् तदुक्तमाद्यैः प्रतिभंनववर्षाणिकारकाश्रयराशितः जन्मसंपद्विपत्क्षेमःप्रत्यरिःसाधकोवधः मैत्रंपरममैत्रंचेत्येवमंतर्दशानयेदिति किंच स्वकेन्द्रस्थाद्याःग्रहाः नवांशानांनवग्रहदत्तानामब्दानांस्वामिनोभवंतीति अयमप्यर्थः सूत्रकारसंमतएव अन्यथासतछाभयोरितिसूत्रस्यवैय्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्थ्यप्रसंगात् अब्दानयनंत्वग्रेवदिष्यतिकेंद्रदशामपरामाह ११ पितृचतुष्टयेषुलग्नादिकेंद्रेषुवैषम्यबलाश्रयोऽधिकब
लयुक्तोराशिः प्रथमदशाप्रदःस्थितःपर्यवसितःनवांशानामित्यनुवृत्याप्रतिराशिनवनवाब्दादशाब्दाग्राह्याः तथाचकें
द्रपणफरापोक्लिमाणांबलाधिकस्यप्रथममितिक्रमेणसर्वदुर्बलांतंदशानेयेति कारकादिग्रहदशाब्दानयनमाह १२
सकारकःतल्लाभयोर्लग्नसप्तमयोरावर्तते अयमाशयः लग्नात्सप्तमाच्चक्रमोत्क्रमगणनयाकारकपर्यंतंराशिसंख्यायत्रा
धिकासाब्दरूपाकारकग्रहदशाअन्येषांतुग्रहात्कारकपर्यंतंविषमसमपदानुरोधेनक्रमव्युत्क्रमगणनयासंख्यासातत्तद्

**पितृचतुष्टयवैषम्यबलाश्रयःस्थितः १२ सतल्लाभयोरावर्तते १३ स्वामिबलफला
निचप्राग्वत् १४ स्थूलादर्शवैषम्याश्रयोमंडूकस्त्रिकूटः १५**

ग्रहाब्दाः कारकयुक्तग्रहाणांतुकारकाब्दतुल्याएवाब्दाभवंतीतिइयंग्रहदशाद्यैरुक्ताः लग्नात्कारकपर्यंतंसप्तमात्द्वाद
शांनयेत् उभयोरधिकासंख्याकारकस्यदशासमाः तद्युक्तानांतुतत्तुल्यंप्रत्येकंस्युर्दशाःक्रमात् ग्रहाकारकपर्यंतंसंख्या
न्यस्यदशाभवेत् कारकस्तद्युतश्चादौतत्केंद्रादिस्थितास्ततः दशाक्रमेणविज्ञेयाःशुभाशुभफलप्रदाः इतिफलमाह
१३ दशास्वामिनांराशीनांग्रहाणांचबलानिफलानिचप्राग्वत् पूर्वोक्तशास्त्रवत्ज्ञेयानीत्यर्थः १४ अथमंडूकदशामाह



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंडूकः मंडूकदशात्रिकूटः चरस्थिरद्विस्वभावात्मकत्रिकूटघटितत्वात्केंद्रादित्रिसमुदायघटितत्वाद्वात्रिकूटाःस्थूलाद
र्शवैषम्याश्रयः लग्नसप्तमयोर्मध्येयोबलवान्तदाश्रयोभवति विषमस्यभावोवैषम्यंअधिकबलत्वमितियावत् अयमाश
यः लग्नसप्तमयोर्मध्येबलिनंराशिमारभ्यदशाप्रवृत्तिः तत्रापिपुरुषश्चेज्जातकवान् तदालग्नसप्तमयोर्बलवतोदशा
नेयास्त्रीजातकवतीचेद्बलवत्सप्तमाद्दशानेयातदुक्तमाद्यैः बलिनःशुक्रशशिनोज्ञेयामंडूकदादशापुरुषश्चेत्ततोनेयास्त्री
चेद्दर्पणतोनयेत् इतिकेंद्रादिक्रमेणमंडूकवदुत्लुत्यपतनान्मंडूकसंज्ञइत्यर्थः तस्मादत्रकेंद्रपणफरापोक्लिमक्रमेणत

## निर्याणलाभादिशूलदशाफले १६ पुरुषेसमाःसामान्यतः १७

त्रापिबलिनःप्राथम्यमितिरीत्यादशानैयेतियावत् प्रतिराशिनवाब्दाग्राह्याः अथफलशूलदशामाह १५ फलेवक्तव्यशू
लदशानिर्याणराशेःसप्तमराशितःप्रवृत्ताभवति शूलदशेतिनाममात्रनिर्देशः रुद्रशूलरुद्राश्रयमहेश्वरर्क्षमारकर्क्षादिनिर्या
णस्थानबाहुल्येन शूलदशानेकविधानवनवाब्दाः अत्रग्राह्याःविशेषविधानातिरिक्तसकलदशासाधारण्येनदशारंभेद
शाब्दानयनेचविशेषमाह १६ सर्वासुदशास्वारंभराशौपुरुषेविषमेसति सामान्यतःआरंभलग्नाद्दशाप्रवृत्तिःसामान्य
तःसमाः अब्दानवनववर्षरूपाग्राह्याः समेसतितुतत्सप्तमान्नवनवाब्दाग्राह्यास्तस्मादेव दशाप्रवृत्तिर्भवतीत्यर्थः सिद्ध

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेव तदुक्तंवृद्धैः ओजेलग्नंतदेवस्यायुग्मेतत्सप्तमंभवेत् दशौजक्रमतोज्ञेयायुग्मेव्युत्क्रमतोमतेति किंच पुरुषेजातकव तिआरंभराशितद्दशाप्रवृत्तिः स्त्रियांजातकवत्यांतुतत्सप्तमाद्दशाप्रवृत्तिःस्यात् तदुक्तं पुरुषश्चेत्ततोनेयास्त्रीचेद्दर्पणतोनये दिति नक्षत्रदशामाह १७ नक्षत्रायुर्दायेविंशोत्तर्यष्टोत्तर्यादिरूपेसमाः अब्दाःसिद्धाः जातकांतरप्रसिद्धायाह्याइत्यर्थः अथयोगार्द्धदशामाह १८ योगार्द्धदशायांप्रतिराशिसमागतचरदशाब्दस्थिरदशाब्दयोर्योगार्द्धंकर्तव्यं तदेवयोगार्द्ध दशाब्दाःयोगार्द्धदशारंभराशिमाह १९ एतद्योगार्द्धस्थूलादर्शवैषम्याश्रयेलग्नेसप्तमयोर्वलवदाश्रयंभवति अयमर्थःल

**सिद्धाउडुदाये १८ जगत्तस्थुषोरर्द्धंयोगार्द्धे १९ स्थूलादर्शवैष**
**म्याश्रयमेतत् २० कुजादिस्त्रिकूटपदक्रमेणदृग्दशा २१**

ग्नेबलवतिलग्नाद्दशाप्रवृत्तिः सप्तमेबलिनितस्माद्दशाप्रवृत्तिर्विषमेक्रमेणसमेव्युत्क्रमेणदशाःप्रवर्तनीयाइति स्त्रीजातक वतीचेद्बलवत्सप्तमाद्दशानेयापुरुषोजातकवांश्चेद्बलवतोदशानेयेति उक्तंचवृद्धैः बलिनस्तुदशानेयाराहोर्हिंशशिशुक्र योः स्त्रीचेद्दर्पणतोनेयापुरुषश्चेत्ततोनयेदिति अथदृग्दशामाह २० कुजादिर्लग्ननवमादित्रिकूटपदक्रमेणदृग्दशाभवति आदौनवमस्यततोदृष्टिचक्रेसंमुखराशेःततःकुत्रचित्क्रमरीत्याकुत्रचिद्व्युत्क्रमरीत्यापंचमस्यततः कुत्रचित्क्रमेणकु



For Private and Personal Use Only

त्रचित्व्युत्क्रमेणैकादशस्यसम्मुखराशेरित्युक्तम् तत्रप्रमाणाभावात्पंचमस्यादौकुतोनउच्यते दृष्टिविषयेआदौअभिप श्यंत्यृक्षाणिततः पार्श्वभेचेतिसूत्रस्वारस्यादेवत्रिकूटपदंत्रिराश्यात्मकंपदंततोदशमस्यततएकादशस्यदृग्दशाभवति नवमदृग्दशादशमदृग्दशाएकादशदृग्दशेतिफलितार्थः अथौजयुग्मपदभेदेनगणनाक्रममुपदिशति २१ स्पष्टम् २२ मातृधर्मयोःपंचमैकादशयोर्गणनायांसामान्यंनकचिदित्यात्मकंसामान्यंसामान्यशास्त्रंओजकूटयोः ओजपदयोर्वि परीतंयुग्मेग्युमपदयोर्यथासामान्यंसामान्यमनतिक्रम्यविज्ञेयं तथाचक्रमाद्वृषेवृश्चिकेचेत्यत्रवृषवृश्चिकयोरोजकूटस्थ

**मातृधर्मयोःसामान्यंविपरीतमोजकुटयोः २२ यथा**

**सामान्यंयुग्मे २३**

त्वाद्व्युक्रमेणपंचमैकादशौदृग्योग्यौसिंहकुंभयोर्युग्मकूटस्थत्वा यथासामान्यंव्युक्रमेणैवपंचमैकादशौदृग्योग्यौभवतः द्विस्वभावे दृग्योग्यपंचमैकादशयोरभावात् दृष्टिचक्रयत्रयत्र दृष्टिस्तत्रादौनवमदशानंतरंसप्तमस्यततोनवमादित्रिकेद्विस्वभावराशिदृग्दशायांपार्श्वराशिद्वयदशाक्रमस्तुपुंराशिश्चेत् द्विःस्वभावस्तर्हिक्रमेणस्त्रीराशिश्चेद्व्युक्रमेणचतुर्थदशमौग्राह्यौ अयंभावः चरराशिषुक्रमेणपंचमैकादशौस्थिरराशिषु व्युक्रमेणपंचमैकादशौदृग्योग्यौभवतस्तथैवपार्श्वराशिदशाक्रमोज्ञेयः द्विःस्वभावराशिषुआदौनवमस्यततःसप्तमस्यत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तोविषमश्चेत् द्विःस्वभावस्तर्हिक्रमेणचतुर्थस्यसमश्चेत्तदाव्युत्क्रमेणचतुर्थस्यततस्तथैवदशमस्येति अत्रनवनवाब्दाग्रा
ह्याः अथत्रिकोणदशामुपदिशति २३ लग्नपंचमनवमेषुयोराशिर्बलवान्ततस्त्रिकोणदशारंभः आरंभराशिमारभ्यक्र
मोत्क्रमाभ्यांद्वादशराशीनांदशाज्ञेयाः एतदुक्तंवृद्धैः लग्नत्रिकोणयोराशिर्बलवानुक्तहेतुभिः तदारभ्योन्नयेच्छ्रीमाञ्चर
पर्यायवद्दशा युग्मराशिभुवांपुंसामोजंगृण्हीतसम्मुखे ओजराशिभुवांस्त्रीणांयुग्मंगृण्हीतसंमुखं ओजराशिभुवांपुंसांगृ
ण्हीयादोजमेवतु युग्मराशिभुवांस्त्रीणांयुग्ममेवसमाश्रयेत् क्रमोत्क्रमाभ्यांगणयेदोजयुग्मेषुराशिषु इतिकथनात्पुरुषे

**पितृमातृधर्मप्राण्यादिस्त्रिकोणे २४ तत्रबाह्याभ्यांतद्व**
**त् २५ धासगैरिकात्पत्नीकरात्कारकैःफलादेशः २६**

जातकवतिक्रमात्स्त्रियांजातकवत्यांतुव्युत्क्रमादित्यर्थः संपन्नःचरपर्यायवद्दशामितिकथनान्नाथांताः समाइतिरित्याव
र्षाण्यत्रग्राह्याणीत्यर्थः पाकभोगराशीदर्शयन्फलमतिदिशति २४ तत्तत्रिकोणदशायांद्वारबाह्यराशिभ्यांतद्वत्पूर्वोक्त
वत्फलंज्ञेयमित्यर्थः तदुक्तमाद्यैः तदिदंचरपर्यायस्थिरपर्याययोर्द्वयोः त्रिकोणाख्यदशायांचपाकभोगप्रकल्पने पाके
भोगेचपापाढ्येदेहपीडामनोव्यथेति तत्तत्कारकेभ्यस्ततत्स्थानफलमाह २५ तत्तत्कारकेभ्योधासगैरिकात्पत्नीक

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रात् सप्तमतृतीयप्रथमनवमेभ्योयथायोगंततत्कारकैः फलादेशःकर्तव्यः अयंभावः सप्तमात्स्त्रीविचारः तृतीयात्कनिष्ठ भ्रातुःकारकात्स्वस्यनवमात्पितुर्धर्मस्यविचारःकार्यइत्यर्थः नक्षत्रदशामाह २६ जन्मदिनेयच्चंद्रस्यनक्षत्रंतदीयाः सर्वर्क्ष रीत्यायाघटिकास्ताद्वादशधाविभज्यप्रथमखंडमारभ्यद्वादशसुखंडेषुलग्नादिद्वादशराशयः क्रमेणगणनीयाः यस्मिन्घ टिकामयेखंडेजन्मसखंडः आदितआरभ्यगणनयाजन्मलग्नादितोयद्राशिविशिष्टस्तंराशिमारभ्यक्रमव्युत्क्रमभेदेनद्वा

तारार्क्षेशेमंदाद्योदशेशः २७ तस्मिन्नुच्चेनीचेवाश्रीमं
तः २८ स्वमित्रभेकिंचित् २९ दुर्गतोऽपरथा ३०

दशराशीनांदशाआनेयाइत्यर्थः अत्रप्रतिराशिनवाब्दाग्राह्याः गुणविशेषतःफलंदर्शयति सूत्रैःसर्वस्पष्टम् २७ २८ २९ तस्मिन्तारालग्नेशेउच्चेनीचेवाराशौसतिजातानराःश्रीमंतोभवंति तारालग्नेशेस्वमित्रराशौसतिकिंचिल्लक्ष्मीवंतोभ वंती अपरथा शत्रुराशौसतिदुर्गातोदरिद्रोभवतीत्यर्थः तदुक्तमाद्यैः जन्मतारेद्वादशधाविभक्तेयत्रचंद्रमाः लग्नात्ताव तिथेराशौन्यसेदाद्यदशाधिपं सयद्युच्चेथवानीचेतदास्याद्राजसेवकः स्वमित्रर्क्षेसुखीशत्रुराशौनिःस्वःसमेसमइति अ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





थांतर्दशोपदशयोःसंचारेविशेषमाहसूत्रैः ३० ३१ ३२ ३३ स्वस्यात्मकारकस्यवैषम्येओजपदत्वेयथास्वंयथारा शिस्वभावंक्रमव्युत्क्रमौज्ञेयौ ओजपदेओजराशिश्चेत्क्रमः युग्मराशिश्चेत्व्युत्क्रमइतिसाम्येयुग्मपदत्वेविपरीतंयुग्मरा शौक्रमः ओजराशौव्युत्क्रमइतिज्ञेयं कारकेयथाओजयुग्मपदभेदेनक्रमव्युत्क्रमतद्विपरीतत्वम् तथाशनावपिवेदित व्यानीत्येकेआचार्यावदंति स्वपदोपादानात्कारकांतर्दशायामुपदशायांचैवेदंबोध्यम् अथदशाफलविशेषमाह ३४

**स्ववैषम्येयथासंक्रमव्युत्क्रमौ ३१ साम्येविपरीतं ३२ शनौचेत्येके ३३ अतर्भुक्त्यंश योरेतत् ३४ शुभादशाशुभयुतेधाम्न्युच्चेवा ३५ अन्यथान्यथा ३६ सिद्धमन्यत् ३७**

शुभयुतेधाम्निराशौसतितद्राशिदशाशुभास्यात् उच्चग्रहयुतेराशौतदधिपेउच्चेवातद्राशिदशाशुभेत्यर्थः ३५ उच्चमित्र शुभयोगलक्षणगुणाभावेसमानीचादियोगसत्वेऽशुभेत्यर्थः ३६ अन्यत्प्रकृतंग्रंथानुक्तंसिद्धंशास्त्रांतरप्रसिद्धंग्राह्यमि त्यर्थः ३७ इतिश्रीनीलकंठज्योतिर्विद्विरचितायांजैमिनीसूत्रव्याख्यायांसुबोधिन्यांद्वितीयाध्यायस्यचतुर्थःपादःस मात्तिमगात् ॥ ४ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ७ ॥ ७ ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदं पुस्तकं श्रीकृष्णात्मज गंगाविष्णु खेमराजाभ्यां मुंबापुर्यां इंडियन प्रिंटिंगाख्य मुद्रणयंत्रालये धात्वक्षरै-
र्मुद्रितम्। शकाब्दाः १८०९। क्रिस्त्यब्दाः १८८८।

पुस्तक मिलनेका ठिकाणः—

**गंगाविष्णु श्रीकृष्णदास,**

श्रीवेंकटेश्वर छापखाना,

**मुंबई.**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिश्रीनीलकंठज्योतिर्विद्विरचितयासुबोधिन्याटीकयासहितं

जैमिनिसूत्रंसमाप्तं.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only